[१.] जीवा चेव अजीवा चेव। [२.] चउव्विहे लोए वियाहिते : दव्वतो लोए, खेत्तओ लोए, कालओ लोए, भावओ लोए। [३.] अत्तभावे लोए सामित्तं पडुच्च जीवाणं लोए, निव्वत्तिं पडुच्च जीवाणं चेव अजीवाणं चेव । [४.] अणादीए अणिहणे पारिणामिए लोकभावे । [५.] लोकतीति लोको । [६.] जीवाण य पुग्गलाण य गतीति आहिता। [७.] जीवाणं चेव पुग्गलाणं चेव गती दव्वतो गती, खेत्तओ गती, कालओ गती, भावओ गती। [८.] अणादीए अणिधणे गतिभावे। [९.] गम्मतीति गती।

[अ.] उद्धगामी जीवा, अहेगामी पोग्गला । [ब.] कम्मप्पभवा जीवा, परिणामप्पभवा पोग्गला। [क.] कम्मं पप्प फलविवाको जीवाणं, परिणामं पप्प फलविवाको पोग्गलाणं। [ड.] णेविमा पया कयाई अव्वाबाहसुहमेसिया कसं कसावइत्ता । [इ.] जीवा दुविहं वेदणं वेदेन्ति पाणातीवात-[....]वेरमणेणं जाव मिच्छादंसणवेरमणेणं । किच्चा जीवा, सातणं वेयणं वेदेन्ति । जस्सट्ठाए बिहेति, समुच्छिज्जिस्सति अट्ठा समुच्चिट्ठिस्सति । णिट्ठितकरणिज्जे सन्ते संसारमग्गा मडाइ णियण्ठे णिरुद्धपवंचे वोच्छिण्णसंसारे वोच्छिण्णसंसारवेदणिज्जे पहीणसंसारे पहीण-संसारवेयणिज्जे णो पुणरवि इत्थत्तं हव्वमागच्छति ।

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि।

पासिज्जनामज्झयणं।

**गतिवागरणगंथाओ पभिति जाव** सामित्तं **इमं अज्झयणं ताव इमो बीओ पाढो दिस्सति, तंजहा :**

[६.] जीवा चेव गमणपरिणता पोग्गला चेव गमणपरिणता। दुविधा गती : पयोगगती य वीससागती य [७.] जीवाणं चेव पोग्गलाणं चेव। [८.] उदइय-पारिणामिए गतिभावे। [९.] गम्ममाणा इति गती।

[अ.] उड्ढंगामी जीवा, अधगामी पोग्गला। [ब.क.] पावकम्मकडे णं जीवाणं परिणामे, पावकम्मकडे णं पुग्गलाणं। [ड.] ण कयाति पया अदुक्खं पकासीति। [इ.] अत्तकडा जीवा, किच्चा किच्चा वेदेन्ति, तंजहा : पाणातिवाएणं जाव परिग्गहेणं।

एस खलु असंबुद्धे असंवुडकम्मन्ते चाउज्जामे णियण्ठे अट्ठविहं कम्मगण्ठि पगरेति, से य चउहिं ठाणेहिं विवागमागच्छति, तंजहा : णेरइएहिं तिरिक्खजोणिएहिं मणुस्सेहिं देवेहिं। अत्तकडा जीवा, णो परकडा, किच्चा किच्चा वेदिन्ति, तंजहा : पाणातिवातवेरमणेणं जाव परिग्गहवेरमणेणं। एस खलु संबुद्धे संवुड-कम्मन्ते चाउज्जामे णियण्ठे अट्ठविहं कम्मगण्ठि णो पकरेति, से य चउहिं ठाणेहिं णो विपाकमागच्छति, तंजहा : णेरइएहिं तिरिक्खजोणिएहिं मणुस्सेहिं देवेहिं। लोए ण कताइ णासी ण कताइ ण भवति ण कताइ ण भविस्सति, भुविं च भवति य भविस्सति य, धुवे णितिए सासए अक्खए अव्वए अवट्ठिए निच्चे। से जहा नामते पंच अत्थिकाया ण कयाति णासी जाव णिच्चा एवामेव लोकेऽवि ण कयाति णासी जाव णिच्चे।

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि।

३२.

दिव्वं भो किसिं किसेज्जा, णो अप्पिणेज्जा। पिं गे ण माहणपरिव्वायएणं अरहता इसिणा बुइतं।

कतो छेत्तं, कतो बीयं, कतो ते जुगणंगलं?
गोणा वि ते ण पस्सामि, अज्जो, का णाम ते किसी ॥ १ ॥
आता छेत्तं, तवो बीयं, संजमो जुगणंगलं।
अहिंसा समिती जोज्जा, एसा धम्मन्तरा किसी ॥ २ ॥
एसा किसी सोभतरा अलुद्धस्स वियाहिता।
एसा बहुसई होइ परलोकसुहावहा ॥ ३ ॥
एयं किसिं कसित्ताणं सव्वसत्तदयावहं।
माहणे खत्तिए वेस्से सुद्दे वावि य सिज्झती ॥ ४ ॥

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि।

पिंगज्झयणं।

३३.

दोहिं ठाणेहिं बालं जाणेज्जा, दोहिं ठाणेहिं पण्डितं जाणेज्जा :

सम्मामिच्छापओतेणं कम्मुणा भासणेण य।
दुभासियाए भासाए दुक्कडेण य कम्मुणा।
बालमेतं वियाणेज्जा कज्जाकज्जविणिच्छए ॥ १ ॥
सुभासियाए भासाए सुकडेण य कम्मुणा।
पण्डितं तं वियाणेज्जा धम्माधम्मविणिच्छये ॥ २ ॥
दुभासियाए भासाए दुक्कडेण य कम्मुणा।
जोगक्खेमं वहन्तं तु उसुवायो व सिंचति ॥ ३ ॥
सुभासियाए भासाये सुकडेण य कम्मुणा।
पज्जण्णे कालवासी वा जसं तु अभिगच्छति ॥ ४ ॥
णेव बालेहि संसग्गिं णेव बालेहि संथवं।
धम्माधम्मं च बालेहिं णेव कुज्जा कदायि वि ॥ ५ ॥
इहेवाकित्ति पावेहिं, पेच्चा गच्छेइ दोगतिं।
तम्हा बालेहि संसग्गिं णेव कुज्जा कदायि वि ॥ ६ ॥
साहूहिं संगमं कुज्जा साहूहिं चेव संथवं।
धम्माधम्मं च साहूहिं सदा कुव्वेज्ज पण्डिए ॥ ७ ॥

इहेव किर्त्तिं पाउणति, पेच्चा गच्छइ सोगतिं ।
तम्हा साधूहि संसग्गिं सदा कुव्विज्ज पण्डिए ॥ ८ ॥
खइणं पमाणं वत्तं च देज्जा अज्जति जो धणं ।
सद्धम्मवक्कदाणं तु अक्खयं अमतं मतं ॥ ९ ॥
पुण्णं तित्थमुवागम्म पेच्चा भोज्जाहि तं फलं ।
सद्धम्मवारिदाणेणं खिप्पं सुज्झति माणसं ॥ १० ॥
सब्भाववक्कविवसं सावज्जारम्भकारकं ।
दुम्मित्तं तं विजाणेज्जा उभयो लोगविणासणं ॥ ११ ॥
सम्मत्तणिरयं धीरं सावज्जारम्भवज्जकं ।
तं मित्तं सुट्ठु सेवेज्जा उभओ लोकसुहावहं ॥ १२ ॥
संसग्गितो पसूयन्ति दोसा वा जइ वा गुणा ।
वाततो मारुतस्सेव ते ते गन्धा सुहावहा ॥ १३ ॥
संपुण्णवाहिणीओ वि आवन्ना लवणोदधिं ।
पप्पा खिप्पं तु सव्वा वि पावन्ति लवणत्तणं ॥ १४ ॥
समस्सिता गिरिं मेरुं णाणावण्णा वि पक्खिणो ।
सव्वे हेमप्पभा होन्ति, तस्स सेलस्स सो गुणो ॥ १५ ॥
कल्लाणमित्तसंसग्गिं संजओ मिहिलाहिवो ।
फीतं महितलं भोच्चा तंमूलाकं दिवं गतो ॥ १६ ॥

अरुणेण महासालपुत्तेण अरहता इसिणा बुइतं ।

सम्मत्तं च अहिंसं च सम्मं णच्चा जितिन्दिए ।
कल्लाणमित्तसंसग्गिं सदा कुव्वेज्ज पण्डिए ॥ १७ ॥

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ।

अरुणिज्जनामज्झयणं तेत्तीसइमं ।

## ३४.

पंचहिं ठाणेहिं—पण्डिते बालेणं परीसहोवसग्गे उदीरिज्जमाणे सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अधियासेज्जा : [१.] बाले खलु पण्डितं परोक्खं फरुसं वदेज्जा। तं पण्डिते बहु मण्णेज्जा : 'दिट्ठा मे एस बाले परोक्खं फरुसं वदति, णो पच्चक्खं। मुक्खसभावा हि बाला, ण किंचि बालेहिन्तो ण विज्जति।' तं पण्डिते सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अधियासेज्जा ।

[२.] बाले खलु पण्डितं पच्चक्खमेव फरुसं वदेज्जा । तं पण्डिए बहु मण्णेज्जा : 'दिट्ठा मे एस बाले पच्चक्खं फरुसं वदति, णो दण्डेण वा लट्ठिणा वा लेट्टुणा वा मुट्ठिणा वा बाले कवालेण वा अभिहणति तज्जेति तालेति परितालेति परितावेति उद्दवेति । मुक्खसभावा हु बाला, ण किंचि बालेहिंतो ण विज्जति ।' तं पण्डिते सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा ।

[३.] बाले य पण्डितं दण्डेण वा लट्ठिणा वा लेट्टुणा वा मुट्ठिणा वा कवालेण वा अभिहणेज्जा....उद्दवेज्जा, तं पण्डिए बहु मण्णेज्जा : 'दिट्ठा मे एस बाले दण्डेण वा लट्ठिणा वा लेट्टुणा वा मुट्ठिणा वा कवालेण वा अभिहणति तज्जेति तालेति परितालेति परितावेति उद्दवेति, णो अण्णतरेणं सत्थजातेणं अण्णयरं सरीरजायं अच्छिन्दइ वा विच्छिन्दइ वा । मुक्खसभावा हि बाला, ण किंचि बाले-हिंतो ण विज्जति ।' तं पण्डिए सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा ।

[४.] बाले य पण्डियं अण्णतरेणं सत्थजातेणं अण्णतरं सरीरजायं अच्छिन्देज्ज वा विच्छिन्देज्ज वा, तं पण्डिए बहु मण्णेज्जा—'दिट्ठा मे एस बाले अण्णतरेणं सत्थजातेणं अच्छिन्दति वा विच्छिन्दति वा, णो जीवितातो ववरोवेति । मुक्खसभावा हि बाला, ण किंचि बालेहिंतो ण विज्जति ।' तं पण्डिए सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा ।

[५.] बाले य पण्डितं जीवियाओ ववरोवेज्जा, तं पण्डिते बहु मण्णेज्जा : 'दिट्ठा मे एस बाले जीविताओ ववरोवेति, णो धम्माओ भंसेति । मुक्खसभावा हि बाला, ण किंचि बालेहिंतो ण विज्जति' । तं पण्डिते सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा ।

---

इ सि गि रि णा माहणपरिव्वायएणं अरहता बुइतं ।

जेण केणइ उवाएणं पण्डिओ मोइज्ज अप्पकं ।
बालेणुदीरिता दोसा, तं पि तस्स हितं भवे ॥ १ ॥

अपडिन्नभावाओ उत्तरं तु ण विज्जती ।
सइं कुव्वइ वेसे णो, अपडिण्णे इह माहणे ॥ २ ॥

किं कज्जते उ दीणस्स णऽण्णत्थ देहकंखणं ।
कालस्स कंखणं वा वि णऽण्णत्तं वा वि हायती ॥ ३ ॥
णच्चाण आतुरं लोकं णाणावाहीहि पीलितं ।
णिम्ममे णिरहंकारे भवे भिक्खू जितिन्दिए ॥ ४ ॥
पंचमहव्वयजुत्ते अकसाए जितिन्दिए ।
से हु दन्ते सुहं सुयती णिरुवसग्गे य जीवति ॥ ५ ॥
जे ण लुब्भति कामेहिं छिण्णसोते अणासवे ।
सव्वदुक्खपहीणो उ सिद्धे भवति णीरए ॥ ६ ॥

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ।

इसिगिरिणामज्झयणं चउतीसइमं ।

## ३५.

चउहिं ठाणेहिं खलु भो जीवा कुप्पन्ता मज्जन्ता गूहन्ता लुब्भन्ता वज्जं समादियन्ति, वज्जं समादिइत्ता चाउरन्तसंसारकन्तारे पुणो पुणो अत्ताणं परिविद्धंसन्ति, तंजहा : कोहेणं माणेणं मायाए लोभेणं । तेसिं च णं अहं परिघातहेउं अकुप्पन्ते अमज्जन्ते अगूहन्ते अलुब्भन्ते तिगुत्ते तिदण्डविरते णिस्सल्ले अगारवे चउविकहविवज्जिए पंचसमिते पंचेन्दियसंवुडे सरीरसाधारणट्ठा जोगसंधणट्ठा णवकोडीपरिसुद्धं दसदोसविप्पमुक्कं उग्गमुप्पायणासुद्धं तत्थ तत्थ इतराइतरकुलेहिं परकडं परणिट्ठितं विगतिंगालं विगतधूमं सत्थातीतं सत्थपरिणतं पिण्डं सेज्जं उवहिं च एसे भावेमि त्ति अ द्दा ल ए णं अरहता इसिणा बुइतं ।

अण्णाणविप्पमूढप्पा पच्चुप्पण्णाभिधारए ।
कोवं किच्चा महाबाणं अप्पा विन्धइ अप्पकं ॥ १ ॥
मण्णे बाणेण विद्धे तु भवमेक्कं विणिज्जति ।
कोधबाणेण विद्धे तु णिज्जती भवसंततिं ॥ २ ॥
अण्णाण ....
माणं .... ॥ ३ ॥
मण्णे ....
माण .... ॥ ४ ॥

एवं मायाए वि लोभे वि दो सिलोका ॥ ५-८ ॥

तम्हा तेसिं विणासाय सम्ममागम्म संमतिं ।
अप्पं परं च जाणित्ता चरेऽविसयगोयरं ॥ ९ ॥
जेसु जायन्ते कोधाती, कम्मबन्धा महाभया ।
ते वत्थू सव्वभावेणं, सव्वहा परिवज्जए ॥ १० ॥
सत्थं सल्लं विसं जन्तं मज्जं वालं दुभासणं ।
वज्जेन्तो तंणिमेत्तेणं, दोसेणं ण वि लुप्पति ॥ ११ ॥
आतं परं च जाणेज्जा सव्वभावेण सव्वधा ।
आयट्ठं च परट्ठं च पियं जाणे तहेव य ॥ १२ ॥
सए गेहे पलित्तम्मि किं धावसि परातकं ? ।
सयं गेहं णिरित्ताणं ततो गच्छे परातकं ॥ १३ ॥
आतट्ठे जागरो होहि. मा परट्ठाहिधारए ।
आतट्ठो हावए तस्स जो परट्ठाहिधारए ॥ १४ ॥
जइ परो पडिसेवेज्ज पावियं पडिसेवणं ।
तुज्झ मोणं करेन्तस्स के अट्ठे परिहायति ? ॥ १५ ॥
आतट्ठो णिज्जरायन्तो, परट्ठो कम्मबन्धणं ।
अत्ता समाहिकरणं अप्पणो य परस्स य ॥ १६ ॥
अण्णातयम्मि अट्टालकम्मि किं जग्गिएण वीरस्स ? ।
णियगम्मि जग्गियव्वं, इमो हु बहुचोरतो गामो ॥ १७ ॥
जग्गाही, मा सुवाही, मा ते धम्मचरणे पमत्तस्स ।
काहिन्ति बहुं चोरा संजमजोगे हिडाकम्मं ॥ १८ ॥
पंचिन्दियाइं सण्णा दण्डा सल्लाइं गारवा तिण्णि ।
बावीसं च परीसह चोरा चत्तारि य कसाया ॥ १९ ॥
जागरह णरा निच्चं, मा भे धम्मचरणे पमत्ताणं ।
काहिन्ति बहू चोरा दोग्गतिगमणे हिडाकम्मं ॥ २० ॥
अण्णायकम्मि अट्टालकम्मि जग्गन्त सोयणिज्जो सि ।
णाहिसि वणितो सन्तो ओसहमुल्लं अविन्दन्तो ॥ २१ ॥
जागरह -णरा णिच्चं, जागरमाणस्स जागरति सुत्तं ।
जे सुवति ण से सुहिते, जागरमाणे सुही होति ॥ २२ ॥
जागरन्तं मुणिं वीरं दोसा वज्जेन्ति दूरओ ।
जलन्तं जातवेयं वा चक्खुसा दाहभीरुणो ॥ २३ ॥
एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ॥
अद्दालइज्जज्झयणं ॥

३६.

उप्पतता उप्पतता उप्पयन्तं पितेण वोच्छामि । किं सन्तं वोच्छामि ? ण सन्तं वोच्छामि 'कुक्कुसया !' वितेण तारायणेण अरहता इसिणा बुइतं ।

पत्तस्स मम य अन्नेसिं, मुक्को कोवो दुहावहो ।
तम्हा खलु उप्पतन्तं सहसा कोवं निगिण्हितव्वं ।

कोवो अग्गी तमो मच्चू विसं वाधी अरी रयो ।
जरा हाणी भयं सोगो मोहं सल्लं पराजयो ॥ १ ॥

वण्हिणो णो बलं छित्तं, कोहग्गिस्स परं बलं ।
अप्पा गती तु वण्हिस्स; कोवग्गिस्सऽमिता गती ॥ २ ॥

सक्का वण्ही णिवारेतुं, वारिणा जलितो बहि ।
सव्वोदहिजलेणावि कोवग्गी दुण्णिवारओ ॥ ३ ॥

एकं भवं दहे वण्ही, दड्ढस्सऽवि सुहं भवे ।
इमं परं च कोवग्गी णिस्सन्कं दहते भवं ॥ ४ ॥

अग्गिणा तु इहं दड्ढा, सन्तिमिच्छन्ति माणवा ।
कोहग्गिणा तु दड्ढाणं दुक्खं सन्ति पुणो वि हि ॥ ५ ॥

सक्का तमो णिवारेतुं मणिणा जोतिणा वि वा ।
कोवतमो तु दुज्जेयो संसारे सव्वदेहिणं ॥ ६ ॥

सत्तं बुद्धी मती मेधा गम्भीरं सरलत्तणं ।
कोहग्गहऽभिभूयस्स सव्वं भवति णिप्पभं ॥ ७ ॥

गंभीरमेरुसारे वि, पुव्वं होऊण संजमे ।
कोवुग्गमरयोधूते असारत्तमतिच्छति ॥ ८ ॥

महाविसे वऽही दित्ते चरेऽदत्तंकुरोदये ।
चिट्ठे चिट्ठे स रूसन्ते णिव्विसत्तमुपागते ॥ ९ ॥

एवं तवोबलत्थे वि णिच्चं कोहपरायणे ।
अचिरेणऽवि कालेणं तवोरित्तत्तमिच्छति ॥ १० ॥

गम्भीरोवि तवोरासी जीवाणं दुक्खसंचितो ।
अक्खेविणं दवग्गी वा कोवग्गी दहते खणा ॥ ११ ॥

कोहेण अप्पं डहती परं च
अत्थं च धम्मं च तहेव कामं ।
तिव्वं च वेरं पि करेन्ति कोधा
अधरं गतिं वा वि उविन्ति कोहा ॥ १२ ॥

कोहाविद्धा ण याणन्ति मातरं पितरं गुरुं ।
अधिक्खिवन्ति साधू य, रायाणो देवयाणि य ॥ १३ ॥

कोवमूलं णियच्छन्ति धणहाणिं बन्धणाणि य ।
पियविप्पओगे य बहू, जम्माइं मरणाणि य ॥ १४॥

जेणाभिभूतो जहती तु धम्मं
विद्धंसती जेण कतं च पुण्णं
स तिव्वजोती परमप्पमादो,
कोधो, महाराज, णिरुज्झियव्वो ॥ १५ ॥

हट्ठं करेतीह णिरुज्झमाणो
भासं करेतीह विमुचमाणो ।
हट्ठं च भासं च समिक्ख पण्णे
कोवं णिरुम्भेज्ज सदा जितप्पा ॥ १६ ॥

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ।
इति तारायणिज्जमज्झयणं ।

## ३७.

[१.] सव्वमिणं पुरा उदगमासि त्ति सिरिगिरिणा माहणपरिव्वायगेण अरहता इसिणा बुइयं ।

एत्थ अण्डे संतत्ते, एत्थ लोए संभूते, एत्थं सासासे, इयं णे वरुण-विहाणे । [२.] उभयो-कालं उभयो-संझं खीरं णवणीयं मधु समिधासमाहारं खारं संखं च पिण्डेत्ता अग्गिहोत्तकुण्डं पडिजागरेमाणे विहरिस्सामीति तम्हा एयं सव्वंति बेमि, [३.] णवि माया, ण कदाति णासि ण कदाति ण भवति ण कदाति ण भविस्सति य ।

पडुप्पण्णमिणं सोच्चा

सूरसहगतो गच्छे : जत्थेव सूरिये ।

अत्थमेज्जा खेत्तंसि वा णिण्णंसि वा तत्थेव णं पादुप्पभायाए रयणीये जाव तेजसा जलन्ते एवं खलु मे कप्पति पातीणं वा पडीणं वा दाहिणं वा उदीणं वा पुरतो जुगमेत्तं पेहमाणे अहारीयमेव रीतित्तए ।

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ।

सिरिगिरिज्जणामज्झयणं ।

## ३८.

जं सुहेण सुहं लद्धं अच्चन्तसुखमेव तं
जं सुखेण दुहं लद्धं, मा मे तेण समागमो ॥ १ ॥

सातिपुत्तेण बुद्धेण अरहता बुइतं ।

मणुण्णं भोयणं भोच्चा मणुण्णं सयणासणं ।
मणुण्णंसि अगारंसि, झाति भिक्खू समाहिए ॥ २ ॥
अमणुण्णं भोयणं भोच्चा अमणुण्णं सयणासणं
अमणुण्णंसि गेहंसि दुक्खं भिक्खू झियायती ॥ ३ ॥
एवं अणेगवण्णागं, तं परिच्चज्ज पण्डिते ।
णण्णत्थ लुब्भई पण्णे एयं बुद्धाण सासणं ॥ ४ ॥
णाणावण्णेसु सद्देसु सोयपत्तेसु बुद्धिमं
गेहिं वायपदोसं वा सम्मं वज्जेज्ज पण्डिए ॥ ५ ॥

**एवं रूवेसु** गन्धेसु रसेसु फासेसु **अप्पप्पणाभिलावेणं**

पंच जागरओ सुत्ता अप्पदुक्खस्स कारणा ।
तस्सेव तु विणासाय पण्णे वट्टिज्ज संतयं ॥ ६ ॥
वाहिक्खयाय दुक्खं वा सुहं वा णाणदेसियं ।
मोहक्खयाय एमेव दुहं वा जइ वा सुहं ॥ ७ ॥
ण दुक्खं ण सुहं वा वि जहा-हेतु तिगिच्छति ।
तिगिच्छिए सुजुत्तस्स दुक्खं वा जइ वा सुहं ॥ ८ ॥
मोहक्खए उ जुत्तस्स दुक्खं वा जइ वा सुहं ।
मोहक्खए जहा-हेऊ न दुक्खं न वि वा सुहं ॥ ९ ॥
तुच्छे जणम्मि संवेगो, निव्वेदो उत्तमे जणे ।
अत्थितादीणभावाणं विसेसो उवदेसणं ॥ १० ॥
सामण्णे गीतणीमाणा, विसेसे मम्मवेधिणी ।
सव्वण्णुभासिया वाणी णाणावत्थोदयन्तरे ॥ ११ ॥
सव्वसत्तदयो वेसो णारम्भो ण परिग्गहो ।
सत्तं तवं दयं चेव भासन्ति जिणसत्तमा ॥ १२ ॥
दन्तिन्दियस्स वीरस्स किं रण्णेणऽस्समेण वा ? ।
जत्थ जत्थेव मोदेज्जा तं रण्णं सो य अस्समो ॥ १३ ॥

किमु दन्तस्स रण्णेणं दन्तस्स वा किमस्समे ? ।
णातिक्कन्तस्स भेसज्जं ण वा सत्थस्सऽभेज्जता ॥ १४ ॥

सुभावभावितप्पाणो, सुण्णं रण्णं वणंपि वा ।
सव्वमेतं हि झाणाय, सल्लचित्ते व सल्लिणो ॥ १५ ॥

दुहरूवा दुरन्तस्स णाणावत्था वसुंधरा ।
कम्मादाणाय सव्वंपि कामचित्ते व कामिणो ॥ १६ ॥

सम्मत्तं च दयं चेव णिण्णिदाणो य जो दमो ।
तवो जोगो य सव्वो वि सव्वकम्मक्खयंकरो ॥ १७ ॥

सत्थकं वा वि आरम्भं जाणेज्जा य णिरत्थकं ।
पडिहत्थिं स जोएन्तो तइं घातेति वारणो ॥ १८ ॥

जस्स कज्जस्स जो जोगो साहेतुंजे ण पचलो ।
कज्जं वज्जेति तं सव्वं कामी वा णग्गमुण्डणं ॥ १९ ॥

जाणेज्जा सरणं धीरो, ण कोडिं एति दुग्गतो ।
ण सीहं दप्पियं छेयं णेभं भोज्जाहि जम्बुओ ॥ २० ॥

वेसपच्चाणसंबद्धे संबद्धं वारए सदा ।
णाणा–अरति–पायोग्गं णालं धारेतु बुद्धिमं ॥ २१ ॥

बम्भचारी जति कुद्धो वज्जेज्ज मोहदीवणं ।
ण मूढस्स तु वाहस्स, मिगे अप्पेति सायकं ॥ २२ ॥

पच्चाणं चेव रूवं च णिच्छयम्मि विभावए ।
किमत्थं गायते वाहो तुण्हिक्का वावि पक्खिता ॥ २३ ॥

कज्जणिव्वत्तिपाओग्गं आदेयं कज्जकारणं ।
मोक्खनिव्वत्तिपाओग्गं, विण्णेयं तं विसेसओ ॥ २४ ॥

परिवारे चेव वेसे य भावितं तु विभावए ।
परिवारेऽवि गम्भीरे ण राया णीलजम्बूओ ॥ २५ ॥

अत्थादाइं जणं जाणे णाणाचित्ताणुभासकं ।
अत्थादाईण वीसंगो पासन्तस्सऽत्थसंतती ॥२६॥

डम्भकप्पं कत्तिसमं णिच्छयम्मि विभावए।
णिखिलामोस कारित्तु, उवचारम्मि परिच्छती ॥२७॥

सब्भावे दुब्बलं जाणे णाणावण्णाणुभासकं ।
पुप्फादाणे सुणंदा वा पवकारघरं गता ॥२८॥

दव्वे खेत्ते य काले य सव्वभावे य सव्वधा ।
सव्वेसिं लिंगजीवाणं भावाणं तु विहावए ॥२९॥

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि।

साइपुत्तिज्जं णामज्झयणं ॥

३९.

जे इमं पावकं कम्मं नेव कुज्जा ण कारवे ।
देवावि तं णमंसन्ति धितिमं दित्ततेजसं ॥१॥
जे णरे कुव्वती पावं अन्धकारं महं करे ।
अणवज्जं पण्डिते किच्चा आदिच्चेव पभासती ॥२॥
सिया पावं सइं कुज्जा तं ण कुज्जा पुणो पुणो ।
णाणि कम्मं च णं कुज्जा साधु कम्मं वियाणिया ॥३॥
सिया [............] कुज्जा तं तु पुणो पुणो
से निकायं च णं कुज्जा साहु भोज्जो वि जायति ॥४॥

रहस्से खलु भो पावं कम्मं समज्जिणित्ता दव्वओ खेत्तओ कालओ भावओ कम्मओ अज्झवसायओ सम्मं अपलिउंचमाणे जहत्थं आलोएज्जा। संजएणं अरहता इसिणा बुइतं ।

णवि अत्थि रसेहिं भद्दएहिं संवासेण य भद्दएण य ।
जत्थ मिए काणणोसिते उवणामेति वहाए संजए ॥१॥

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ।

संजइज्जं नामज्झयणं ॥

४०.

इच्छमणिच्छं पुरा करेज्जा । दीवा य णे ण अरहता इसिणा बुइतं ।

इच्छा बहुविधा लोए जाए बद्धो किलिस्सति ।
तम्हा इच्छमणिच्छाए जिणित्ता सुहमेधती ॥१॥
इच्छाभिभूया न जाणन्ति मातरं पितरं गुरुं ।
अधिक्खिवन्ति साधू य रायाणो देवयाणि य ॥२॥
इच्छामूलं नियच्छन्ति धणहाणिं बन्धणाणि य ।
पियविप्पओगे य बहू जम्माइं मरणाणि य ॥३॥
इच्छन्तेणिच्छते इच्छा अणिच्छं तं पि इच्छति ।
तम्हा इच्छं अणिच्छाए जिणित्ता सुहमेहती ॥४॥

इ न्द ना गे ण अरहता इसिणा बुइतं ।

मासे मासे य जो बालो कुसग्गेण आहारए ।
ण से सुक्खायधम्मस्स अग्घती सतिमं कलं ॥१३॥
मा ममं जाणऊ कोयी माहं जाणामि किंचि वि ।
अण्णातेणऽत्थ अण्णातं चरेज्जा समुदाणियं ॥१४॥
पंचवणीमगसुद्धं जो भिक्खं एसणाए एसेज्जा ।
तस्स सुलद्धा लाभा हणणादीविप्पमुक्कदोसस्स ॥१५॥
जहा कवोता य कविंजला य
गावो चरन्ती इह पातडाओ ।
एवं मुणी गोयरियं चरेज्जा
णो वीलवे णो वि य संजलेज्जा ॥१६॥

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ।

इइ इन्दनागिज्जज्झयणं ॥

## ४२.

अप्पेण बहुमेसेज्जा जेट्ठमज्झिमकण्णसं ।
णिरवज्जे ठितस्स तु णो कप्पति पुणरवि सावज्जं सेवित्तए ।

सो मे ण अरहता इसिणा बुइतं ।

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ।

इइ सोमिज्जं णामज्झयणं ॥

## ४३.

लाभम्मि जे ण सुमणो अलाभे णेव दुम्मणो ।
से हु सेट्ठे मणुस्साणं देवाणं व सयक्कऊ ॥१॥

ज मे ण अरहता इसिणा बुइतं ।

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ।

इइ जम-णामज्झयणं ॥

## ४४.

दोहिं अंगेहिं उप्पीलन्तेहिं आता जस्स ण उप्पीलति ।
रागंगे य विदोसे य से हु सम्मं णियच्छती ।

व रु णे णं अरहता इसिणा बुइतं ॥

एवं से सिद्धे बुद्धे....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ॥

इइ वरुण-णामज्झयणं ।

## ४५.

अप्पं च आउं इह माणवाणं ।
सुचिरं च कालं णरएसु वासो ।
सव्वे य कामा णिरयाण मूलं
को णाम कामेसु बुहो रमेज्जा ? ॥१॥
पावं ण कुज्जा, ण हणेज्ज पाणे ।
अतीरसे णेव रमे कदायी ।
उच्चावएहिं सयणासणेहिं
वायु व्व जालं समतिक्कमेज्जा ॥२॥

वे स म णे णं अरहता इसिणा बुइतं ।

जे पुमं कुरुते पावं ण तस्सऽप्पा धुवं पिओ ।
अप्पणा हि कडं कम्मं अप्पणा चेव भुञ्जती ॥३॥
पावं परस्स कुव्वन्तो हसते मोहमोहितो ।
मच्छो गलं गसन्तो वा विणिघायं ण पस्सति ॥४॥
पच्चुप्पण्णरसे गिद्धो मोहमल्लपणोल्लितो ।
दित्तं पावति उक्कण्ठं वारिमज्झे व वारणो ॥५॥
परोवघाततल्लिच्छो दप्पमोहबलुद्धुरो ।
सीहो जरो दुपाणे वा गुणदोसं ण विन्दती ॥६॥
सवसो पावं पुरा किच्चा दुक्खं वेदेति दुम्मती ।
आसत्तकण्ठपासो वा मुक्कधारो दुहट्टिओ ॥७॥
पावं जे उ पकुव्वन्ति जीवा सोताणुगामिणो ।
वड्ढते पावकं तेसिं अणग्गाहिस्स वा अणं ॥८॥
अणुबद्धमपस्सन्ता पच्चुप्पण्णगवेसका ।
ते पच्छा दुक्खमच्छन्ति गलुच्छित्ता जधा झसा ॥९॥
आताकडाण कम्माणं आता भुंजति जं फलं ।
तम्हा आयस्स अट्ठाए पावमादाय वज्जए ॥१०॥
जे हुतासं विवज्जेति जं विसं वा ण भुंजति ।
जं णं गेण्हति वा वालं णूणमत्थि ततोऽभयं ॥११॥

धावन्तं सरसं नीरं सच्छं दाढिं सिंगिणं ।
दोसभीरू विवज्जेन्ती, पावमेवं विवज्जए ॥१२॥
पावकम्मोदयं पप्प दुक्खतो दुक्खभायणं ।
दोसा दोसोदई चेव पावकज्जा पसूयति ॥१३॥
उव्विवारा जलोहन्ता तेतणीए मतोट्ठितं ।
जीवितं वा वि जीवाणं जीवन्ति फलमन्दिरं ॥१४॥
देज्जाहि जो मरन्तस्स सागरन्तं वसुंधरं ।
जीवियं वा वि जो देज्जा, जीवितं तु स इच्छती ॥१५॥
पुत्तदारं धणं रज्जं विज्जा सिप्पं कला गुणा ।
जीविते सति जीवाणं जीविताय रती अयं ॥१६॥
आहारादि तु जीवाणं लोए जीवाण दिज्जती ।
पाणसंधारणट्ठाय दुक्खणिग्गहणा तहा ॥१७॥
सत्थेण वण्हिणा वा वि खते दड्ढे व वेदणा ।
सए देहे जहा होति एवं सव्वेसि देहिणं ॥१८॥
पाणी य पाणिघातं च पाणिणं च पिया दया ।
सव्वमेतं विजाणित्ता पाणिघातं विवज्जए ॥१९॥
अहिंसा सव्वसत्ताणं सदा णिव्वेयकारिका ।
अहिंसा सव्वसत्तेसु परं बम्भमणिन्दियं ॥२०॥
देविंदा दाणविंदा य णरिंदा जे वि विस्सुता ।
सव्वसत्तदयोवेतं मुणीसं पणमन्ति ते ॥२१॥
तम्हा पाणदयट्ठाए तेल्लपत्तधरो जधा ।
एगग्गयमणीभूतो दयत्थी विहरे मुणी ॥२२॥
आणं जिणिन्दभणितं सव्वसत्ताणुगामिणिं ।
समचित्ताऽभिणन्दित्ता मुच्चन्ती सव्वबन्धणा ॥२३॥
वीतमोहस्स दन्तस्स धीमन्तस्स भासितं जए ।
जे णरा णाभिणन्दन्ति ते धुवं दुक्खभायिणो ॥२४॥
जेऽभिणन्दन्ति भावेण जिणाणं तेसि सव्वधा ।
कल्लाणाइं सुहं च रिद्धीओ य ण दुल्लहा ॥२५॥
मणं तधा रम्ममाणं णाणाभावगुणोदयं ।
फुल्लं व पउमिणीसण्डं सुतित्थं गाहवज्जितं ॥२६॥
रम्मं मन्तं जिणिन्दाणं णाणाभावगुणोदयं ।
कस्सेयं ण प्पियं होज्जा इच्छियं व रसायणं ? ॥२७॥

नण्हातो व सरं रम्मं वाहितो वा रुयाहरं ।
छुहितो व जहाऽऽहारं रणे मूढो व बन्दियं ॥२८॥
वण्हि सीताहतो वा वि, णिवायं वाऽणिलाहतो ।
तातारं वा भउव्विग्गो अणत्तो वा धणागमं ॥२९॥
गम्भीरं सव्वतोभद्दं हेतुभंगणयुज्जलं ।
सरणं पयतो मण्णे जिणिन्दवयणं तहा ॥३०॥
सारदं व जलं सुद्धं पुण्णं वा ससिमण्डलं ।
जच्चमणिं अघट्टं वा थिरं वा मेतिणीतलं ॥३१॥
साभावियगुणोवेतं भासते जिणसासणं ।
ससीतारापडिच्छण्णं सारदं वा णभंगणं ॥३२॥
सव्वण्णुसासणं पप्प विण्णाणं पवियम्भते ।
हिमवन्तं गिरिं पप्पा तरूणं चारु वागमो ॥३३॥
सत्तं बुद्धी मती मेधा गंभीरत्तं च वड्ढती ।
ओसधं वा सुयक्कन्तं जुज्जए बलवीरियं ॥३४॥
पयंडस्स णरिंदस्स कन्तारे देसियस्स य ।
आरोग्गकारणो चेव आणाकोहो दुहावहो ॥३५॥
सासणं जं णरिन्दाओ कन्तारे जे य देसगा ।
रोगुग्घातो य वेज्जातो सव्वमेतं हिए हियं ॥३६॥
आणाकोवो जिणिन्दस्स सरण्णस्स जुतीमतो ।
संसारे दुक्खसंबाहे दुत्तारो सव्वदेहिणं ॥३७॥
तेलोक्कसारगरुयं धीमतो भासितं इमं ।
सम्मं काएण फासेत्ता पुणो ण विरमे ततो ॥३८॥
बद्धचिन्धो जधा जोधो वम्मारूढो थिरायुधो ।
सीहणायं विमुचित्ता पलायन्तो ण सोभती ॥३९॥
अगन्धणे कुले जातो जधा णागो महाविसो ।
मुंचित्ता सविसं भूतो पियन्तो जाती लाघवं ॥४०॥
जधा रुप्पिकुलुब्भूतो रमणिज्जं पि भोयणं ।
वन्तं पुणो स भुंजन्तो धिद्धिक्कारस्स भायणं ॥४१॥
एवं जिणिन्दआणाए सल्लुद्धरणमेव य ।
णिग्गमो य पलित्ताओ सुहिओ सुहमेव तं ॥४२॥

इन्दासणी ण तं कुज्जा, दित्तो वण्ही, अणं अरी ।
आसादिज्जन्तसम्बन्धो जं कुज्जा रिद्धिगारवो ॥४३॥
सगाहं सरबुद्धं विसं वामणुजोजितं ।
सामिसं वा णदीसोयं साताकम्मं दुहंकरं ॥४४॥
कोसीकिते व्वऽसी तिक्खो भासच्छण्णो व पावओ ।
लिंगवेसपलिच्छण्णो अजियप्पा तहा पुमं ॥४५॥
कामा मुसामुही तिक्खा, साता कम्माणुसारिणी ।
तण्हासातं च, सिग्धं च तण्हा छिन्दति देहिणं ॥४६॥
सदेवोरगगन्धव्वं सतिरिक्खं समाणुसं ।
वत्तं तेहिं जगं किच्छं तण्हापासणिबन्धणं ॥४७॥
अक्खोवंगो, वणे लेवो, तावणं जं जउस्स य ।
णामणं उसुणो जं च जुत्तितो कज्जकारणं ॥४८॥
आहारादीपडीकारो सव्वण्णुवयणाहितो ।
अप्पाहु तिव्ववण्हिस्स संजमट्ठाए संजमो ॥४९॥
हेमं वा आयसं वा वि बन्धणं दुक्खकारणं ।
महग्घस्सावि दण्डस्स णिवाए दुक्खसंपदा ॥५०॥
आसज्जमाणे दिव्वम्मि धीमता कज्जकारणं ।
कत्तारे अभिचारित्ता विणीयं देहधारणं ॥५१॥
सागरेणावणिजोको आतुरो वा तुरंगमे ।
भोयणं भिज्जएहिं वा जाणेज्जा देहरक्खणं ॥५२॥
जातं जातं तु विरियं सम्मं जुज्जेज्ज संजमे ।
पुप्फादीहि पुप्फाणं रक्खन्तो आदिकारणं ॥५३॥

एवं से सिद्धे बुद्धे ....णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ॥

वेसमणिज्जं णाम अज्झयणं ॥
इसिभासियाइं समत्ताइं ॥

१

सोयव्वं ति श्रोतव्यं शिक्षितव्यमेव वदतीति श्रोतव्यमेव प्रवदति येन समयं यद् आदाय मुच्यते लोकः सर्वदुःखेभ्यः । —तस्माच्छ्रोतव्यात् परं न किञ्चिदस्ति श्रोतव्यम् । सोयं ति शौचमिति पुस्तकानां पाठः वृद्धलेखकानां भ्रम इति नाद्रियते । प्राणातिपातं त्रिविधं त्रिविधेन काय-वाङ्-मनोभिरेव, चरण-करण-त्रिकाभ्यामिति चेन्न, नैव कुर्यान्न कारयेदिति करणत्रिकस्य प्रथम-द्वितीयाङ्गयोरुक्तत्वात् । मृषावादोऽदत्तादानमब्रह्म-परिग्रहाविति द्वितीयादीनि श्रोतव्यानि, चतुर्थ-पञ्चमे त्वेकीभूते इति चित्रम् । (१) (२)॥ अडयं ति अटमान इति मन्यामहे, उपधानं तपस्, तत् सेवमान उपधानवान् भवति (३)॥ सत्यमदत्तं ब्रह्मचर्यम् चेति त्रीण्येवोपसेवते श्रद्धी, उपधानवन्ति चैतानि त्रीण्येवोक्तानि महाव्रते द्वितीय(प्रथम)पञ्चमे अनादृत्य ।

एवं स बुद्धो विरतो विगतपापो दान्तो द्रव्योऽलं ति समर्थस्त्यागी त्रायी वा न पुनरपि इच्चत्थं ति इत्यर्थं लौकिकवृत्त्यर्थं इत्थत्तं ति वाऽत्रत्वमत्रभावित्वं समागच्छति समागमिष्यतीति ब्रवीमीति सर्वेष्वप्यध्ययनेषूक्तमालापकमस्मिन् प्रथम एव लिखितुमलमिति । नारदाध्ययनम् ।

२

यस्मात् कृत्यात् पापकर्मणो भीताः पलायन्ते दीर्णेऽव वाहिनी सेना तदेवादाय जीवाः कर्मानुगामिनो भवन्तीत्यस्य श्लोकस्य द्वितीय-चतुर्थपादयोरपरिहार्यो विनिमयः (१) ॥—अप्पे त्ति आत्मनि (२)॥ (३) (४) (५) (६) (७) ॥ दुःखमूलं च मोहजन्मनीति सप्तमे श्लोक उक्ते अज्ञानेन संसारे समर्जितं यस्मात् तस्मात् कर्माणि मूलतो हन्यात् । मृगारिः सिंहो यथोषरं प्राप्य सरउत्पत्तिं मार्गतीति पञ्चदशाध्ययनानुसारेणाध्याहार्यम्—; अस्य तु श्लोकस्य तृतीयपादोऽन्यस्मात् कस्माच्चिदन्वयादिहैव प्रविष्टो भविष्यति (४)॥ वात्सीपुत्राध्ययनम् ।

३

लेपः कर्म कषायो वा । भवितव्यं खलु सर्वलेपोपरतेन । लेपोपलिप्ताः खलु भो जीवा अनमदग्रं दीर्घाध्वानं चतुरन्तं संसारसागरमनुपरिवर्तन्त इत्याद्यनेकशब्दा लुप्ताः । लेपोपरतास्तु संसारं व्यतिक्रान्ता जीवा शिवेत्यादिविशेषितं स्थानमभ्युप-

गतास्तिष्ठन्ति । स जीवः सर्वकर्मविरतो भवति न च क्वचित् सजति, तस्मात् सर्वलेपोपरतो भविष्यामीति कृत्वैवमर्हतर्षिणा भाषितम् ।। इति चिन्हितपुस्तकमनुसृत्य न केवलं हिंसा-परिग्रहाभ्यां किन्तु मृषावादाऽदत्तादान-मेहुनैर्वर्णितः कर्मलेपः, पाठस्त्वधस्ताल्लिखितः (१) ।। (२) (३) (४) (५) (६) ।। क्षीरं यथा दूषि विषं प्राप्य विनाशमुपगच्छत्येवं रागो वा द्वेषो वा ब्रह्मचर्यविनाशनौ भवतः (७)।। यथा तु प्रधानं विशिष्टं क्षीरं मूर्च्छनया दधि जायत एवं गृद्धिदोषेण पापं कर्म प्रवर्धते (८)।। अरण्ये दवाग्निना दग्धा वनपादपाः पुना रोहन्ति, मुनेस्तु क्रोधाग्निना दग्धानां दुःखानां निवर्तनं प्रत्यागमो न भवति । कस्तु नाम दुःखानां प्रत्यागममिच्छेदित्यस्पष्टम् (९) असित-देविलाध्ययनम् ।

## ४

आदानं कर्मोपादानं, तद् रक्षति निगूहतीत्यादानरक्षी । आदानरक्षी भवति पुरुषो, न किञ्चिज्जानात्यपरं जनम् । असाधुकर्मकारी खल्वयं पुरुषः, पुनरपि पापैः कर्मभिश्चोद्यते नित्यं संसार इति । —यस्य पापं शीलं जानन्ति तेन संवस्तुं न शक्नुवन्ति मानवास्तस्मात् परममत्यर्थं प्रतिच्छन्ना निगूढा भवन्ति मायया दुष्टमानसाः (१)।। निजदोषान् हि निगूहन्नात्मानं चिरमपि नोपदर्शयेदिह न कोऽपि मां जानीयादिति मत्वाऽऽत्महितं स्वयं न जानाति (२)।।(३)।। सुयाणि त्ति सुयाणे त्ति स्थाने सुज्ञातं भवति चित्रं भित्त्यां काष्ठे वा निवेशितम्, इदं मनुष्यहृदयं तु गहनं दुर्विज्ञातव्यम् (४)।। अन्यथा स भवति मनसि, अन्यत् कर्मणा चेष्टितेन कुर्वन्ति, अन्यत् तु भाषन्ते, एवमन्येभ्यो मनुष्येभ्यो गहनः खलु स पुरुषः (५)।। (६) (७) (८) (९) (१०) ।। पूर्वरात्रे तथाऽपररात्रेऽतीतातीततरकाले सङ्कल्पेन चिकीर्षया बहु कृतं यत् सुकृतं वा दुष्कृतं वा कर्म तत् कर्तारमनुगच्छति तस्य जीवे सजति (११)।। सुकृतं दुष्कृतं वाऽप्यात्मनैव जानाति, न त्वन्यः कश्चिदेनं विजानाति (१२)।। (१३) (१४) (१५) (१६) (१७) (१८) (१९)।। यो यत्र विद्यते भावो यो वा यत्र न विद्यते स स्वभावेन सर्वोऽपि लोके प्रवर्तते (२०)।। विषं वाऽमृतं वाऽपि स्वभावेनोपस्थितम्, एवं चन्द्रसूर्यौ मणिर्ज्योतिस्तमोऽग्निर्वायुः क्षितिः (२१)।। वदतु जनो यदस्येष्टम्, तृणवत् तद् गणयामि, किं नु करोम्यहं यज्जनेनात्मतः स्वभावेनोदीर्णम् ? नैवास्मि तस्य कर्तेति भावः नास्तीदृशं मम भावितमिति संख्यायाऽहं न संज्वलामि न क्रुध्ये, किंतु जनस्याक्षेपं क्षमे । इदं तु ऽश्रुतिगर्भं वैतालीयमन्यस्य कस्यचित् कवेः कृतिरिव दृश्यते (२२)।। (२३) (२४)।। आङ्गिरस भरद्वाजाध्ययनम् ।

५

मानात् प्रत्यवतीर्य मानं त्यक्त्वा विनय आत्मानमुपदर्शयेत् ।–(१)।। क्रोध-मानप्रहीणस्यात्मा पर्यायान् जानाति । क्रोधस्थाने शमं सेवते मानस्थाने मार्दवम् (२)।। (३) (४) पुष्पशालपुत्राध्ययनम् ।

६

मातङ्ग इति ललितविस्तरग्रन्थतृतीयपरिवर्तानुसारेण कस्यचित् प्रत्येकबुद्धस्य नाम । अस्य त्वर्षेर्बुद्धक्षेत्रं रिञ्चतस्तेजोधातुं च समापद्योल्कैव परिनिर्वाणस्येहाध्ययनस्य गद्ये च पद्ये चानुल्लेखितत्वान् मातङ्गो गज एवेत्यपरिहार्या व्याख्या । गजो मरणार्थं गहनं वनं यातीति प्रसिद्धम् । मातङ्गवदाचरन् श्राद्धो मातङ्गश्राद्धः । गजो यथा तमसि गहन उपरतो मृतस्तथा श्राद्धोऽपि कायभेदाय मरणायैकाक्ययेव प्रायोपगमं गच्छति । आयति भविष्यत्काले तं देवदानवानुमतं प्रशस्यमित्युदाहरेदुदाहरिष्यति जनः तेनाऽयं खलु भो लोकः सनराऽमरो वशीकृत एवेति मन्ये, तमहं विरतं विरजस्कं वेति ब्रवीमि । हे पुरुष, नारीगणप्रसक्तो मा भूरात्मनश्चाबान्धवः – हे पुरुषाः, यस्मादारम्भाद् व्रजथ नरकमिति शेषः तस्माद् युद्धशीलो जनोऽपि व्रजति । स्त्रीगृद्धो हिंसकश्चोभौ पापकारिणौ कर्मफलं लप्स्येते इति भावः (१)।। निरङ्कुश इव मातङ्गश्छिन्नरश्मिर्हयोऽपि वा भ्राम्यति, एवं ज्ञान–प्रग्रह-प्रभ्रष्टो विविधं प्लवते विनाशं गच्छति नरः (२)।। अकर्णधारा नौरिव सागरे वायुनेरिता चञ्चला धावते नौरिति द्वितीयपदमतिरिक्तं स्वभावादकोविदा, पुष्पमिवाऽऽकाशे मुक्तं स्थापितम् , एवं निराधारः स नरः, पुष्पमिव दृढ-शुल्ब-निबद्धं, एवं दृढसूत्रनिबद्ध इति षष्ठे श्लोकेऽभिहितमिहैवाध्याहार्यं नरो बलवन्तं तपोविधिं विहरेदिति विहरतेः सकर्मकः प्रयोगः (३.४) यथा सूत्रमात्रगतिमेव गन्तुकाम एवं सन्मार्गं लप्स्यते स्वभावादकोविदोऽपि (५)।। जं तु त्ति अस्य पादस्यार्थासुगमत्वादम्बर इव विहंगम इति पादं मुक्त्वा पष्ठस्य श्लोकस्यानुवादो न दीयते (६)।। (७) (८) (९)।। विरतो वक्तुं व्यरमद् यदि वा विरजस्क एवाभवद् ऋषिरुग्रतपः । वल्कलचीर्यध्ययनम् ।

७

सर्वं दुःखं दुःखावहं, दुःखं सोत्सुकत्वमिच्छा । दुःखी व त्ति इवेति न, किं तु इवेति । आक्षिप्तं निन्दितं पुरुषं जनवादो न त्याजयेत् तपःसंयमौ, समाधिं च विराधयति स हिनस्ति यो रिष्टचर्याम् अपूर्णतपश्चर्यां चरति (१)।। यः कश्चिदालस्येन कारणनोत्सुकत्वं न गच्छति तेनापि स सुखी भवति भवतु इत्यर्थः, किं तु परंतु श्रद्धी सधीर्धीमान् वा

पराक्रामेदालस्यं न गच्छेत् (२)॥(३)॥ काममकामकारी परिव्रजेद् अत्तत्ताए त्ति आत्मत्वार्थम् आत्महितार्थं सर्वं सावद्यं परिज्ञाय प्रत्याख्याय निरवद्येन चरितेन परिव्रजेत् (४)॥ कूर्मापुत्राध्ययनम् ।

८

आरं ति इहलोके द्विगुणेन द्विगुणपाशेनेव दृढतरं बध्यते जीव इति शेषः, पारं ति परलोक एकगुणेन केवलेन सम्यक्त्वेन । –हे पुरुष, जीवरथस्य शम्यामिवाणिमिव छिन्द्धि पापं कर्म, रथशम्या लुप्यमाना गच्छति नश्यति, इत्येवमुक्तशो ग्रन्थच्छेदको विशिष्टो मुनिर्लोकबन्धनं जहाति त्यजति कोशाद् रथनीडाद् आकील इव । अत्र प्रथम-तृतीयपादयोर्विनिमयो द्वितीयाध्ययनवत् कार्यः (१)॥ तस्माद् य एतद् ग्रन्थजालं विविधानि लोकबन्धनानि विज्ञाय दुःखं दुःखावहं छित्वा संयमे तिष्ठति स खलु मुनिर्दुःखाद् विमुच्यते । केतलिपुत्राध्ययनम् ।

९

यावद् यावज्जन्म तावत् तावत् कर्म । कर्मणा खलु भो प्रजा स्यात्, सम्यक् चरितमनुसृत्योपनिचीयतेऽपचीयते च कर्म ।–कर्मणा खलु भो अप्रहीणेन पुनरपि हस्तादिच्छेदनानि शीर्षदण्डनान्यागच्छत्यनुभवति जीवः, उदीर्णेन तु कर्मणा कुट्टनानीत्यादि, अन्दु त्ति शृङ्खला, तया बन्धनानि, निगडबन्धनानि, सीहपुच्छणाणि त्ति श्रीअभयदेवेन औपपातिकवृत्तौ मेहनत्रोटनमिति व्याख्यातानि, कडग्गिदाहणाइं ति कटकेन वेष्टितुं प्रदीपनमिति दशाश्रुतस्कन्धचूर्णिः, शेषं कण्ठ्यम्, केवलं दुःखानि प्रत्यनुभवमानो जीवः संसारसागरमनुपरिवर्तते (१)॥(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)॥ उपक्रम उत्कर्षश्च, तथा संक्षोभः संक्षेपः क्षपणं बद्धस्पृष्टनिधत्ताणं ति निहितानां भवति कर्मप्रदेशानाम्, निकाचिते च कर्मणि वेदना पोडा (१२)॥ उत्कृष्यमाणं यथा तोयं सार्यमाणं यथा जलं कर्म संक्षपयेत्, अन्यत्र निदाने परलोकमधिकृत्य फलेप्सुः पापं कर्म शेषमुदीरयति (१३)॥ अल्पा स्थितिः शरीराणां, बहु च पापं दुष्कृतं भवति, पूर्वं बध्यते पापं, तस्मात् तपो दुष्करं मतम् (१४)॥ योगयुक्तस्य धीमतः पापकर्माणि क्षीयन्ते बह्व्य ऋद्धयश्च जायन्ते कर्मभागक्षयभूताः (१५)॥ यदि कश्चित् तपः-संयमप्रयुक्तस्य विमर्दो विरोधो भवति, तदा विद्यौषधिनिपाणेषु दृष्टिवादवस्तुशिक्षागतिषु च तस्य प्रत्ययः (१६)॥ सुकृतेण च दुष्कृतेन च मिश्रेऽपि सति कर्मबन्धने युक्तात्मा साधुः पापं दुःखं क्षपयति यथा मिश्रेऽपि हिताहितमिश्रितेऽपि पुष्पाणां ग्राहे संग्रहे विषवन्ति पुष्पाणि छर्दितानि भवन्ति (१७)॥ सम्यक्त्वं च दयां चैव दुर्लभां

सम्यगासाद्य मेधावी न प्रमाद्येद् यथाऽऽर्यो न प्रमाद्यति मर्मग्राहमासाद्य (१८)॥ (१९)॥ पूर्वायुक्तया च विद्यया क्षणं व्याधिर्निगच्छति (२०)॥(२१)(२२)(२३)(२४) (२५)(२६)॥ वस्त्रादिषु शोध्येषु शुद्धिं प्रापयितव्येषु मार्गितव्येषु वा तपसश्च संताने षष्ठादिभक्तावल्यां पिण्डग्रहणे च देशधर्मित्वमपूर्णं धर्मानुष्ठानं बहुशो दृष्टं, एतत् धर्मित्वं तु सम्यङ् निःशेषं विभावयेत् प्राकाश्यं नयेत् (२७)॥ तस्य फलमुच्यते यथा आपद्यते कर्मप्रदेशानां समुद्घातः स्फोटनकल्पः, योगानां काय-वाङ्-मनःकर्मरूपाणां निरोधः, अनिवृत्तिरपुनर्भवः, शैलेशी योगनिरोधरूपावास्था, सिद्धिर्निर्वाणं तथा कर्मक्षयः (२८)॥ पूर्वयोगेनासङ्गतानि भवन्ति कायो वाङ् मन इति वा, एकान्तेन कर्माभावादिहलोकागतिर्न विद्यते (३०)॥ स्वग्रहाभावाज्ज्ञानदर्शनावरणक्षयाच्च परं ति परमं सुखी भवति पुरुषः, ध्रुवमसंशयं स नित्यः परमश्चास्त्युक्तलक्षणसद्भावात् (३१)॥(३२) (३३)॥ महाकाश्यपाध्ययनम् ।

१०

कः कं स्वस्थाने नामगोत्रादिलक्षणे स्थापयति नान्यत्र स्वकीयानीमानि कर्माणि? तेतलिपुत्रार्हतर्षिणा भाषितमिति अत्रैव प्रवेशनीयं श्रद्धेयमित्यादिवाक्यानां पूर्वगतेनासम्बद्धत्वात् । श्रद्धेयं खलु भो श्रमणा वदन्ति ब्राह्मणाश्च, एकोऽहमश्रद्धेयं वदिष्यामि । सपरिजनमपि नाम मां दृष्ट्वा अपरिजनोऽहमस्मीति को मे तच्छ्रद्धास्यति न कश्चिदित्यर्थः, एवमेव सपुत्रं समित्रं सवित्तं सपरिग्रहम् । दान-मान सत्कारोपचारसंगृहीतश्च तेतलिपुत्रः सस्वजन-परिजनो विरागं गतः, जाति-कुल-रूप-विनयोपचारशालिनी पोट्टिला मूषिकारदुहिता मिथ्या विप्रतिपन्ना, काल-क्रम-नीतीविशारदस्तेतलिपुत्रो विषादं गतः, तेतलिपुत्रेणामात्येन सता गृहं प्रविश्य तालपुटं नाम विषं खादितं तत् तु प्रतिहतम् । तेनैव नीलोत्पल-गवल-गुलिकाऽतसी-कुसुमप्रकाशोऽसिः क्षुरधारः स्कन्धे निपातितः, सोऽपि च तस्यासिरुच्चलतीति ॥—पुस्तकस्य पाठः, तेनैव मयाऽतिमहान्तं वृक्षमधिरुह्य च्छिन्नः पाश इत्यपूर्णा कथा, तथाऽपि च न मृतः, तेनैव मयाऽतिमहान्तं पाषाणं ग्रीवायां बद्ध्वाऽस्ताघायां पुष्करिण्यामात्मा प्रक्षिप्तः तथाऽपि च स्थाघो लब्धः, तेनैव मयाऽतिमहान्तं काष्ठराशिं प्रदीप्याऽऽत्मा प्रक्षिप्तः सोऽपि च तस्याग्निकायो विध्यातः, सर्वमेतत् को मे श्रद्धास्यतीति ?

ततः सा पोट्टिला मूषिकारदुहिता पञ्चवर्णानि सखिङ्खिणिकानि प्रवरवस्त्राणि परिधाय देवी भूतेति ज्ञाताधर्मकथानां चतुर्दशं तेतलिज्ञातमनुसृत्याध्याहार्यमन्तरिक्ष-

प्रतिपन्नैवमवादीद् यथा "आयुष्मंस्तेतलिपुत्र एहि तावद् आजानीहि यत् पुरतो विस्तीर्णो गिरिशिखरकन्दरप्रपातः, पृष्ठतो कम्पमानमिव मेदिनीतलम्, संकृष्यमाण इव पादपः, निःस्फोटयन्निवाम्बरतलम्, सर्वतमोराशिरिव पिण्डितः, प्रत्यक्षमिव स्वयं कृतान्तः भीमरवं कुर्वन् महावारणः समुत्थितः; उभयतःपार्श्वे चक्षुर्निपाते सुप्रचण्ड-धनुर्यन्त्रविप्रमुक्ताः पुङ्खमात्रावशेषा धरणीप्रवेशिनः शरा निपतन्ति, हुतवहज्वालासहस्र-संकुलं समन्ततः प्रदीप्तं धगधग इति शब्दायते सर्वारण्यम् अचिरेण च बालसूर्यगुञ्जार्ध-पुञ्जनिकरप्रकाशं क्षायत्यङ्गारभूतं गृहम् । आयुष्मंस्तेतलिपुत्र क्व व्रजावः ? ततः स तेतलिपुत्रामात्यः पोट्टिलं मूषिकारदुहितरमेवमवादीद् यथा "पोट्टिले, एहि तावद आजानीहि यल्लोकभीतस्य जनस्य खलु भोः प्रव्रज्या हिता, अभियुक्तस्य हितं प्रत्ययकरणम्, अध्वपरिश्रान्तस्येत्युक्तज्ञाताद् अध्याहार्यं वहनकृत्यम्, मायिनो रहस्यकृत्यम्, उत्कण्ठितस्य स्वदेशगमनकृत्यम् क्षुधितस्य भोजनकृत्यम् पिपासितस्य पानकृत्यम्, परं पुरुषमभियोक्तुकामस्य शास्त्रकृत्यम् । क्षान्तस्य तु दान्तस्य गुप्तस्य जितेन्द्रियस्यैषामेकमपि न भवति । तेतलिपुत्राध्ययनम् ।

## ११

आज्ञाय लौकिकज्ञानमधिगम्य शिष्टजन इवेति वा एवेति वा भवत्यमुनिः, परं-त्वज्ञात्वालौकिकज्ञानमनधीत्याऽऽध्यात्मिकं सङ्ख्यायावधार्यैवैष स एव मुनिस्त्रायी भवति। त्रायी तु कीदृश इत्युच्यते—स पुरुष एजति व्येजति क्षुभ्यति घट्टति स्पन्दति चलति उदीरयति तं तं भावं परिणमति, न स त्रायी । स नैजति यावत् परिणमति, स त्रायो । त्रायिणां च खलु नास्त्येजनं व्येजनं क्षोभनं घट्टनं स्पन्दनं चलनं उदीरणं तं तं भावं परिणामः । त्रायी खल्वात्मानं च परं च चतुरन्तात् संसारकान्तारात् त्रातीति त्रायी । असंमूढस्तु यो नेता मार्गदोषात् कुमार्गदोषं वर्जयन् पराक्रमो यस्य स तथा, सन्मार्गेण व्रजन्नित्यर्थः । गमनीयां गतिं ज्ञात्वा गामिनं तां प्रापयति (१) ॥ शिष्ट-कर्मा तु यो वैद्यः शस्त्रकर्मणश्च कोविदः स वोरः सन् रोगिणं मोचयति मोचनीयाद रोगात् (२) यस्तु द्रव्याणां गुणलाघवे विधानं संयोजयति तृणमिव तानि गणयति, स सत्यं संयोगनिष्पन्नं कार्यं करोति (३)॥विद्योपचारविज्ञाता विद्योपचारयोः कोविदो यो धीमान् सत्त्वसंयुतो भवति स विद्यां साधयित्वा तत्क्षणं कार्यं करोति (४)॥ (५)॥ मस्करिपुत्राध्ययनम् ।

## १२

यावद् यावल्लोकैषणा लोकसम्बन्धस्तावत् तावद् वृत्तैषणा लोभ इति तद्विपरीतश्चालापको द्रष्टव्यः। आणच्च त्ति आज्ञायेतीहासंनद्धत्वात् पूर्वगताध्ययनस्य टिप्पणत्वाच्चानादृतम्। स मुनिर्लोकैषणां च वृत्तैषणां च परिज्ञाय त्यक्त्वा गोपथा गच्छेन्न महापथा राजमार्गेण। —तद् यथा कार्यं तदुच्यते : गावः प्रातराशं चरन्ति, इह त्ति स्थाने इव त्ति युक्ततरमिव दृश्यते, एवं मुनिर्गोचर्या-प्रविष्टः सँल्लाभे सति नालपेन्न मुदा लपेन्नापि चालाभे क्रोधेन संज्वलेत् (१)॥ पञ्च वनीपका अतिथि-कृपण-ब्राह्मण-कुक्कुर-श्रमणास्तैः शुद्धां दोषवर्जितां भिक्षां य एषणयैषयेत् तस्य हननदोषविप्रमुक्तस्य लाभाः सुलभा भवन्ति (२)॥ पथां मार्गाणां रूपसम्बद्धामनुरूपां फलाप्तिं च चिन्तयेत् क्रोध-मान-माया-लोभानां पिण्डैषणायामनुभूतानां चात्मानं परं चाधिकृत्य विपाकम् (३)॥ याज्ञवल्कीयमध्ययनम्।

## १३

किमर्थं त्वया लावण्यं मैत्री नास्ति न क्रियत इति बलात् प्रतिबुबोधयिषन्तं कञ्चिच्छ्रावकं प्रति भाषितम्। — नाहं खलु भो आत्मनो विमोचनार्थाय परमभिभविष्यामि, मा भूत् स परोऽभिभूयमानो ममैवाहिताय पापकर्मविपाकायेत्युक्तप्रकारेणाक्षिप्तश्रावकस्य स्यादध्यवसायः। सर्वेषां संसारवासे शान्तानां तुष्टानां गृही श्रावको यदि वा गृहिणां श्रावकाणां बृंहणरतः प्रशंसाप्रियः कर्मोपादानाय भूत्वा तैः प्रत्युक्तः कथमिति कुतोऽर्थे मे हन्तुमिच्छसीति (१)॥ सा बृंहणरतिः शान्तस्य करणं नास्ति, शान्तो नैवं करोतीत्यर्थः, किं तु नाशयतो हिंसकस्य करणं भवेत्। नाशयतस्तु भवसंकरः संसारहिण्डनं भविष्यति, तद् बहुधा सुदृष्टं गुरुभिः (२)॥ हिंसितं पुरुषं त्विदं शान्तमबाधायुक्तं कर्मैतेन द्वारेण प्रकारेणोपस्थितं भवति, यथा मयैव पुरः पूर्वभवे यत् कृतं तस्य स परोऽत्र निमित्तमात्रं विपाककारयितैव भवतीति (३)॥(४)॥ यस्य यदस्ति कर्म तद्विपाकेन लुप्यते, यदशान्तमुदीरितं कर्म भवति तस्य न किञ्चिल्लुप्यते उदीरणावशादेव, शान्तात् कर्मणः किञ्चिल्लुप्यते किञ्चिन्न, शान्तेरसंक्षिप्तत्वात्, विपाकात् पूर्वं तु न लुप्यते शान्तं कर्म (५)॥ यत्कारणं भिक्षादिमार्गितस्य किञ्चिदस्ति तेन मम ददाति, यत्कारणं नास्यास्ति किञ्चित् तेनापि मम ददाति स्वधनस्यानङ्गीकारात्, यदि त्वस्य स्याद् यदि स्वधनमङ्गीकुर्यात् ततो मम न दद्यात्

नास्त्यस्येति नाङ्गीकरोति तस्माद् मम ददातीत्येवमनयोः श्लोकयोरर्थः सम्यगगत इत्याशामहे (६)॥ मैत्रेयभयाल्यध्ययनम् ।

## १४

युक्तमयुक्तयोगं न प्रमाणम् । — आत्मना खलु भो आत्मानं समुत्कृष्योन्नमय्य न भवति बद्धचिह्नो राजलक्षणसंयुक्तो नरपतिः, आत्मानं समुत्क्रष्टुं नावश्यं तस्य सर्वपूजितत्वात्, तद्वद् विश्वमानितस्य श्रेष्ठिनः स्ववेषविशिष्टस्य । हे श्रमणा ब्राह्मणाश्च, अनुयोगे सत्युक्तस्य हेतुं यदि पृच्छथेत्यर्थः, एवमेव जानीत खलु भो यथा ग्रामे वाऽरण्ये वा, केवले वा ग्रामे न त्वरण्ये यदि कश्चिदिमं लोकमभिनिश्रयेत सेवेत परं वा लोकं देवलोकं प्रणिश्रयेत, न तत् सारवद् उभयोर्लोकयोरप्रतिष्ठितत्वादशाश्वतत्वात् । एष युक्तोपायानामयुक्तयोगः । तदेवोदाहरति यथा अकामको बाहुको मतः स्मृतः, मुक्तकामो ह्यकामकस्तपश्चरते:चरितवान्, अकामकः कालगतः पूर्वकर्मवशान्नरकं प्राप्तः, मनुष्यलोकोपपन्नोऽकामकः प्रव्रजितस्तपश्चरितवान् कालगतः सिद्धिं प्राप्तः सर्वत्राकामकः । सकामकस्तद्वत्, केवलं किं सिद्धिं प्राप्त इति प्रश्नः, नेत्युत्तरम् ॥ बाहुकाध्ययनम् ।

## १५

शातं सुखं, तस्मादुत्पन्नं दुःखं शातदुःखम् । किं तेनाभिभूत उताशातदुःखेनाभिभूतो दुःखी दुःखमुदीरयतीति पृच्छा । न शातदुःखेन नाशातदुःखेनेत्युत्तरम्, उदीरणाहेतोर्निःसारत्वादित्यर्थः संभाव्यते । अपरा पृच्छा यथा किं दुःखी शातदुःखेनाभिभूतस्योताशातदुःखेनाभिभूतस्य परस्य दुःखिनो दुःखमुदीरयतीति । शाताभिभूतस्येत्युत्तरं दुःखिनोऽभिभवपूर्वं सुखीभावात् । पृच्छा च व्याकरणं चेति प्राचीनटिप्पणी । पुनः पृच्छा यथा किं शान्तं बाधारहितं दुःखं दुःख्युदीरयत्युताशान्तमिति । शान्तमेवेत्युत्तरमुदीरितस्योदीरणाया निरर्थकत्वात् । —दुःखेन खलु भो अप्रहीणेनेत्यादि नवमाध्ययनगमेन नेतव्यं कम्म त्ति स्थाने दुःखाभिलापेन (१)॥ (२)॥ कन्दस्यैवं सति स्वभावे ध्रुवं निःशङ्कं वल्ल्यारोहणं भवति, बीजे समुह्यमानेऽपि अङ्कुरस्यैव संपद् भविष्यति (३)॥(४)(५)॥ पापघाते हतं दुःखं यथा फलं हतं पुष्पघाते कृते, कुतस्तालफलस्य संभवो विद्रायां सत्यां मूर्धसूच्यां हते, तालपादपस्य शिखरे, तालफलानि द्रुमस्याग्रे पच्यन्त इति प्रसिद्धम् (६)॥(७)॥ दुःखितो दुःखघातार्थमन्यं कञ्चिच्छरीरिणं पुरुषं दुःखाकृत्वा वेदनां प्रापयित्वा एकस्य दुःखस्य प्रतीकारेणान्यद् दुःखं निबध्नातीति विरोधः (८)॥(९) (१०)॥

परस्य पापं कुर्वन् हसति मोहमोहितः, मत्स्य इव गलमिति ग्रीवादीति न, किं त्वामिषं, तद् ग्रसन् विनिघातं विनाशं न पश्यति (११)॥(१२) ॥ परोपघातपरो दर्प-मोहमलैरुद्धुर उद्धतो गुणदोषान् न विन्दति यथा वृद्धः सिंह उदपानं गतः प्राणिनो हन्ति विवेकमकृत्वा, यदि वा यथा सिंह एकविंशाध्ययनकथितः परं जिघांसते (१३) ॥(१४) (१५) (१६) (१७) (१८) (१९)॥ पाषाणेनाऽऽहतः कीवः पक्षिविशेषः क्षिप्रं पाषाणं दशति, मृगारिः सिंह ऊषरं प्राप्य सरउत्पत्तिमेव मार्गति, कीव-सिंहौ निरर्थकं कुरुत इति भावः (२०)॥ तथा तेनैव प्रकारेण बालो दुःखी दुःखपीडितो बाहिरं वस्तु भृशं निन्दति, न तु दुःखोत्पत्ति-विनाशौ प्राप्नोति सिंह इवेति द्वे पदे अतिरिक्ते (२१)॥ व्रणं वह्निं कषायान् ऋणं चाऽऽमगं ति रोगं च यद् वाऽप्यन्यद् दुःस्थितं तद् उद्वहन्तोऽनुभवन्तः पीवरं महद् दुःखं प्राप्नुवन्ति मानुषाः (२२)॥ वणिहस्स त्ति वह्नेर्ऋणकर्मणः आमकस्स त्ति रोगस्य व्रणस्य च निःशेषं घातिनां यथासंख्यं निवारयितुर्दातुश्चिकित्सकस्य च श्रेय आनन्दो भवति गतमिति, वह्न्यादीनि तु कालेन प्रत्यागमिष्यन्ति यथा द्रुमश्छिन्नोऽपि पुना रोहति (२३)॥ यथा वह्निर्भस्मच्छन्नो वा यथा रिपुर्गूढक्रोधो वा तथा लीनं गूढं पापकर्म दुःखसन्तानसङ्कटं भवति (२४)॥(२५) (२६) (२७) (२८)॥ मधुरायणीयमध्ययनम् ।

## १६

यस्य खलु भो इन्द्रियाणि विषयाचारा न परिस्रवन्ति द्रवैरिव, स खलु भवत्युत्तमः पुरुषः । — तद् परिस्रवणं कथमिति पृच्छा । मनोज्ञेषु शब्देषु रूपेषु गन्धेषु रसेषु स्पर्शेषु श्रोत्र-चक्षुर्नासा-तालु-त्वग्विषयप्राप्तेषु न सजेत न रज्येत न गृध्येत नाध्युपपद्येत न विनिघातमापद्येत । मनोज्ञेषु शब्दादिषु श्रोत्रादिविषयं प्राप्तेषु सजमानो रज्यमानो गृध्यमानोऽध्युपपद्यमानः सुमनाः सदभिप्रायवांस्तान् आसेवमानो विप्रवहतः पापकर्मणो भवति आदानाय तत् कर्माऽऽददातीत्यर्थः । तस्मात् तेषु मनोज्ञेषु प्रागुक्तेषु न सजमान इत्यादि न सुमना इत्याद्युक्तपापकर्मणा न दुष्येत् । (१)॥(२)॥ वह्निः परिणामतेजः शरीरमाहारं ति आहारेण यथा युनक्ति योगेन कारणेन तथा योगान् विजानीहीन्द्रियाणि तत्प्रयोगांश्च युञ्जतः इति श्लोकस्योत्तरार्धस्य शङ्कनीयोऽर्थः (३)॥ शौर्यायणाध्ययनम् ।

## १७

यया बन्धनं च मोक्षं च जीवानां च गत्यागतावात्मभावं च जानाति सा विद्या दुःखमोचनी (२)॥ इयं विद्या महाविद्या भवति सर्वविद्यानामुत्तमा, यां विद्यां

साधयित्वा सर्वदुःखेभ्यो मुच्यते (१)॥ एष त्वर्थत एव श्लोकयोरनुक्रम इति व्यक्तम् (३)॥(४)॥ मर्म सशल्यजीवं च पुरुषं वा मोहघातिनं गुरुं शल्योद्धरणयोगं च यो जानाति स शल्यहा (५)॥ (६) (७)॥ परकीयसर्वसावद्ययोगं दुश्चरितमिहाद्य नाचरेत् अपरिशेषं सर्वथा निरवद्ये चरिते स्थितस्य न कल्पते पुनरपि सावद्यं सेवितुम् । एतानि गद्य-पदानि विदु-नामर्षेर्भाषितमिति दृश्यते, पूर्वगतास्तु तृतीयादयः श्लोकाः शेषभाषितानां कल्पेन तद्विवरणत्वाद् गद्यानुबद्धव्याः ॥ विद्वध्ययनम् ।

## १८

अयतो त्यक्तयत्नः खलु भो जीवः पुरुषो वज्रं हिंसां समाददाति । कथमेतत् ? प्राणातिपातेनादिनाऽरतिरतिभ्यां मृषामायया मिथ्यादर्शनशल्येन वज्रं समादाय हस्तादिच्छेदनानि प्रत्यनुभवमानाः संसारसागरमनुपरिवर्तन्ते जीवा यथोक्तं नवमाध्ययने। यः खलु भो जीवो वज्रं न समाददाति, कथमेतत् ? अस्यास्तु पृच्छाया उत्तरादवियोजनीयत्वाद् ऋषि-नाम अयत इत्यादि प्रथमवाक्यमनुसारयितव्यम्। उत्तरं तु यथा प्राणातिपातादिविरमणेन श्रोत्रादीन्द्रियनिग्रहेण वज्रमसमर्ज्य हस्तादिच्छेदनानि व्यतिपत्य शिवं स्थानमभ्युपगतास्तिष्ठन्ति । शकुनी शङ्कुप्रघातं तथा वारिपात्रधरो वरत्रं रज्जुं च विभज्य विभावयेत्ताम् (१)॥ वार्षगण्याध्ययनम् ।

## १९

सर्वमिदं जगत् पुराऽतीतकाल आर्यमासीत् । —(१)॥(२) (३) (४)॥ किंरूपं तु तदार्यमिति आर्यं साधु ज्ञानादित्रयं, तस्माद् आर्यं सेवस्व (५)॥ आर्यायणाध्ययनम् ।

## २०

उत्कटाः पञ्च प्रज्ञप्ताः, तद् यथा दण्डोत्कटो रज्जूत्कटः स्तेनोत्कटो देशोत्कटः सर्वोत्कटः । दण्डोत्कटो नाम यो दण्डदृष्टान्तेन आद्यमध्यावसानानां प्रज्ञापनया समुदयमात्रं शरीरमित्येतान्यभिधानानि व्याहरन् नास्ति शरीरात् परं जीव इत्येतेन प्रवादेन च भव-गति-व्यवच्छेदं वदति । रज्जूत्कटो नाम यो रज्जुदृष्टान्तेन समुदयमात्रशरीरप्रज्ञापनया पञ्चमहाभूतस्कन्धमात्रं शरीरमित्येतान्यभिधानानि व्याहरन् संसारसंसृतिव्यवच्छेदं वदति । स्तेनोत्कटो नाम योऽन्यशास्त्रदृष्टान्तग्राहैः स्वपक्षोद्भावनानिरतो ममैतदितिव्याहरन् परकरणच्छेदं वदति । देशोत्कटो नाम योऽस्ति न्वेष जीव इति सिद्धे सति अकर्त्रादिकैर्ग्राहैर्जीवस्य देशोच्छेदं अपूर्णं छेदं वदति । सर्वोत्कटो नाम यः सर्वतो जीवस्य संभवाभावान् न तृतीयं संभवासंभवयोः परं प्रागुक्तं देशसम्भवं भवति,

किं तु सर्वतः सर्वथा सर्वकालं नास्ति जीव इति सर्वच्छेदं वदति । एतं नास्तिकवादमुदाहरति यथा ऊर्ध्वं पादतलेऽधः केशाग्रमस्तके एष आत्मपर्ययः कृत्स्नस्त्वक्पर्यन्तो जीवः एष जीवो जीवति, एतज्जीवितं भवति । यथा दग्धेषु बीजेषु न पुनरङ्कुरोत्पत्तिर्भवति एवमेव दग्धे शरीरे न पुनः शरीरोत्पत्तिर्भवति । तस्मादिदमेव जीवितं, नास्ति परलोको, नास्ति सुकृतदुष्कृतकर्मणां फलवृत्तिविशेषः । न प्रत्यायान्ति जीवा, न स्पृशन्ति पुण्य-पापे, अफलं कल्याणपापकम् । तस्मादेतत् सम्यगिति ब्रवीमि यथा ऊर्ध्वमित्यादि यावत् त्वक्पर्यन्तो जीवः । एष मृतो, नैतज्जीवितं भवति । यथा नामादग्धेषु बीजेष्वन्याङ्कुरोत्पत्तिर्भवति एवमेवादग्धे शरीरेऽन्याङ्कुरोत्पत्तिर्भवति, तस्मात् तपःसंयमाभ्यां मूले शरीरं दग्ध्वा न पुनः शरीरोत्पत्तिर्भवतीति II–चिह्नितपुस्तकानुसारेणाध्याहार्यं नास्तिकं प्रत्युक्तम् तस्मात् पुण्यपापाग्रहणात् कर्मलब्धसुखदुःखसंभवाभावाच्छरीरदाहे पापकर्माभावाच्च शरीरं दग्ध्वा न पुनः शरीरोत्पत्तिर्भवति ॥ उत्कटाध्ययनम् ।

## २१

नाहं पुरा किञ्चिज्जानामि सर्वलोके । –अज्ञानमूलमज्ञानं कारणं यथा तथा खलु भो पूर्वं न जानामि न पश्यामि नाभिसमवैमि नाभिसंबोधामि, ज्ञानमूलं खलु भो इदानीं जानामि यावद् अभिसंबोधामि । अज्ञानमूलं खलु मम कामैः कृत्यं करणीयम्, ज्ञानमूलं खलु मम कामैरकृत्यमकरणीयम् । अज्ञानमूलं जीवाश्चतुरन्तं संसारं परिवर्तन्ते, ज्ञानमूलं जीवास्तं व्यतिपतन्ति । तस्मादज्ञानं परिवर्ज्य ज्ञानमूलं सर्वदुःखानामन्तं करिष्यामि कृत्वा शिवमचलं यावच्छाश्वतं स्थानं अभ्युपगतः स्थास्यामि । (१)॥ अज्ञानवशान्मृगा विहंगाः पक्षिणो मत्तवारणाश्च पाशैर्बध्यन्ते, मत्स्या आमिषेभ्यः स्रंसन्ति, अज्ञानं सुमहद्भयं भवति (२)॥(३) (४) ॥ दीपे पातः पतङ्गस्य कौशिकारेः पक्षिणो बन्धनं किम्पाकफलभक्षणं च त्रीण्येतान्यज्ञानस्य निबन्धनानि भवन्ति (५)॥ अज्ञानमोहितो वृद्धः सिंहः कथाप्रसिद्धो द्वितीयं सिंहमुदपानस्थं दृष्टवान् संभग्नगात्रयष्टिर्निधनं गतो मृतः (६)॥ सिंहश्च भुजङ्गश्चाज्ञानविमोहितौ ग्राहदंशनिपातेन द्वावपि विनाशं गताविति का कथेति न ज्ञायते (७)॥ सुप्रियं तनुजं माता भद्रा नामाज्ञानविमोहिता तत्प्रतिबोधशोकेनात्मघातं कृत्वा व्याघ्रीभूता क्रुद्धा सत्यभिद्रुत्याखादीदिति सुकोशलमातृसहदेवीकथा, सा तु किमिहाधिक्रियते न वेति शङ्क्यते (८)॥ औषधानां विन्यासः संयोगानां योजनं भेषजानां मिश्रणं विधानां च साधनमज्ञानेन न सिध्यति, सिध्यति तु ज्ञानयोगेन (९, १०)॥ गृहपतिपुत्राध्ययनम् ।

२२

परिशाति हिंसकं कर्म, अपरिशातिनो बुद्धाः, तस्मात् खल्वपरिशातिनो बुद्धा नोवलिप्यन्ते रजसा पुष्करपत्रमिव वारिणा। --धर्मा इति ग्रामधर्मा मैथुनाभिलाषः। ग्रामधर्माः पुरुषादिकाः पुरुषप्रवराः पुरुषज्येष्ठाः पुरुषमेवाधिकृत्य कल्पिताः प्रद्योतिताश्च पुरुषं समन्वागता भवन्ति, पुरुषमेवाभियुज्य पुरुषमवेक्षमाणास्तिष्ठन्ति। यथा नामारतीति गण्डविशेषः स्याच्छरीरे जाता शरीरे वृद्धा शरीरं समन्वागता शरीरमेवाभियुज्य तिष्ठति, एवं गण्डः स्फोटो शरीरे जात इत्यादि, वल्मीकः स्तूपो वृक्षो वनखण्डः पृथिव्यां जातः पुष्करिणी पृथिव्यां जाता पुष्कर उदके जातोऽग्निकायोऽरण्यां जातोऽरणीमेवाभिभूय तिष्ठति, एवमेव धर्मास्तिष्ठन्ति।

धिक् तेषां ग्रामनगराणां येषां स्त्रियः प्रणायिकाः, ते चापि धिक्कृताः पुरुषा ये स्त्रीणां वशं गताः (१)॥ सुदिव्या भावका प्रेक्षणीया मधुरोदका पुष्पिता रम्येव पद्मिनी ग्राहाकुला, मालतीव व्यालाक्रान्ता, हैमगुहेव ससिंहा, मालेव वध्यकल्पिता, गन्धयुक्तिरिव सविषा, वाहिनीव नदी सेना वा अन्तर्दुष्टा, मदिरेव गरान्ता, योगकन्या स्त्रीरिव योगपरा शालिनी गृहिणी, एवं नारी लोके विज्ञेया भवेत् स्वगुणोदया प्रकटीकृतस्त्रीदोषा (२-४)॥ कुलानां तूत्सादनं द्रव्यहीनानां लाघवम् अनादरः सर्वदुःखानां प्रतिष्ठा निष्ठा निधनं चार्यिकाणां वैराणां गम्भीरं गुप्तं गृहं सद्धर्मचारिणां विघ्नो दुष्टाश्वः मुक्तखलिनः, एवं श्रुता लोके किमङ्गना कुस्त्री, लाघवो अस्खलीणं बलवं ति पञ्चम-षष्ठश्लोकयोः पदेषु लिङ्गविपर्ययः (५ ६)॥ यत्र तु ग्रामेषु नगरेषु वा स्त्री बलवती तदनश्वस्य शुनादेर्हेषा शब्द इव पर्वरहितेषु वा दिनेषु मुण्डनमिव भवति (७. ८)॥ हुताशाद् भयं दाहो विषान्मरणं शस्त्राच्छेदो व्यालाद् दशनम् (९)॥ शङ्कनीयं च यद् वस्तु यच्चाप्रतीकारं तद् सुष्ठु व्यक्तं जानीयाद् यो युज्यमानानि युज्यमानानां वस्तूनामनुयोजयिता भवति (१०)॥ यत्र ये समारम्भा ये वैतेषां सानुबन्धा भवन्ति तानि वस्तूनि सुष्ठु जानीयात्, नैतत् सर्वविनिश्चये नैतदंधताहिते अनादृत्य निश्चयनीयम् (११)॥ यत्र येषां समारम्भाणां सुखोत्पत्तिर्भवति ये वैतेषां सानुगामिनोऽनुगमसहिता विनाशिनो वा विपरीतं वा भवन्ति तान् जानीयात् कालवेदविद्, वेद इतीह लौकिकं ज्ञानम् (१२)॥ (१३) (१४)॥ नवमश्लोकादारभ्य परिसाडो कम्मे त्ति-आदि-ऋषिभाषितं पुष्करपत्रोपमान्तमनुबध्यते इति व्यक्तम्॥ दगभलाध्ययनं गर्धभीयेत्यपरनामकम्।

२३

द्वे मरणेऽस्मिंल्लोक एवमाख्यायेते, तद् यथा सुखमृतं चैव दुःखमृतं चैव। —अत्र विंशतिं व्याख्यानं ब्रवीमि। इमस्य खलु ममीकारिणोऽसमाहितलेश्यस्यासमाहितमनोवृत्तिकस्य गण्ड इति ग्रन्थ्यर्थे तेन परिघातितस्य बाधितस्य बन्धनपरिघातस्येति पाठोऽशङ्कनीय एव गण्डबन्धनप्रतिघातं करिष्यामि। अलं पुरो-मतेन दुःखं मरणमिति। तस्मात् तं पूर्वोक्तं कृत्वा ज्ञान-दर्शन-चारित्राणि प्रतिसेविष्ये। ज्ञानेन ज्ञात्वा दर्शनेन दृष्ट्वा संयमेन संयम्य तपसाऽष्टविधकर्मरजोमलं विधूय विशोध्यानादिकमनवदग्रं दीर्घाध्वानं चतुरन्तसंसारकान्तारं व्यतिपत्य शिवमित्यादिविशेषितं सिद्धिगतिनामधेयं स्थानं संप्राप्तोऽनागताध्वानं शाश्वतं कालं स्थास्यामीति प्रतिबोधितस्य कस्यचिदध्यवसायः॥ रामपुत्रीयाध्ययनम्।

२४

सर्वमिदं पुरा भव्यं भवितव्यावेक्षम्, इदानीं पुनरभव्यं भवितव्यानवेक्षं भवति। च्यवन्ते खलु भो नैरयिका नैरयिकत्वात् तिर्यग्योनस्तिर्यग्योनित्वान्मनुष्या मनुष्यत्वाद् देवा देवत्वाद्, अनुपरिवर्तन्ते जीवाश्चतुरन्तं संसारकान्तारं कर्मानुगामिनः। तथाऽपि मम जीव इहलोके सुखोत्पादकः, परलोके दुःखोत्पादकोऽनिजोऽध्रुवोऽनित्यः, अणितिए अणिच्चे त्ति पदे समव्युत्पत्तो, सजति यावन्मुह्यत्यध्युपपद्यते विनिघातमापद्यते। इमां च पुनः शटन-पतन-विकिरण-विध्वंसनधर्मामनेकयोगक्षेमसमायुक्तां जीवस्यातीर्थां संसारनिर्व्यष्टिं करोति लोकप्रपञ्चं सेवते। इमां संसारनिर्व्यष्टिं कृत्वा संसारकान्तारमनुपरिवर्तते। तं त्वनुवृत्य संवेग-निर्वेदौ गत इति अर्थपूरणार्थमध्याहार्ये, परं तु शिवमित्यादि यावत् चिट्ठिस्सामि त्ति अपास्यं मिथ्येह निवेशितत्वात्। तस्मादध्रुवमशाश्वतमिदं संसारे सर्वजीवानां संसृतिकारणमिति ज्ञात्वा ज्ञान-दर्शन-चारित्राणि सेविष्ये तानि सेवित्वा संसारकान्तारं व्यतिपत्य शिवं स्थानमभ्युपगतः स्थास्यामीत्यत्र निश्चयः।

वाडघाणे त्ति पदस्यार्थो न ज्ञायते (१) (२)॥ वट्टि त्ति वृत्तिः परिवर्तः, शीघ्रया तया समायुक्ता रथचक्रे यथाऽराः स्फटन्तो वा भङ्गुरा वल्लिच्छेदास्तथा शरीरिणः पुरुषस्य सुहदुक्खे त्ति द्विवचनं संस्कृतकल्पम् (३)॥ संसारे सर्वजीवानां गृद्धिः संपरिवर्तत उदुम्बरतरूणां प्रसवदोहदो यथा व्यसनोत्सवकारणं स्त्र्यङ्गचेष्टादीनां हेतुः (४)। वह्निमित्यादि सद्यो मेघमिव चिन्तयेद् अकाण्ड आगमन-गमनशीलम् (५)॥ (६) (७) (८) (९) (१०)॥ वत्तेयणिच्चत त्ति वर्तते वर्तेत वाऽनित्यता, षोडशेऽपि

श्लोके एवमेव (११)॥ (१२) (१३) (१४) (१५) (१६) (१७) ॥ या कान्तिर्वयोऽवस्था वा येन कर्मणा युज्यते तादृशी तस्या निर्वृत्तिर्भवति वाचः प्रतिश्रुदिव (१८) ॥ ताहं तासाम् इह सम्बन्धे तु ताभ्यां कान्ति-वयोभ्यां कृतेनोदयेनोद्भूता नानागात्रविकल्पिता अनेकगात्रेषु कृता भङ्गोदयाः संसारे सर्वदेहिनामनुवर्तन्ते ताभ्यामनित्यत्वात् (१९) ॥ (२०) ॥ अथ कर्मोच्यते । बुध्यते चैव कर्म हेतुयुक्तं शुभाशुभं यथा वल्लीनां फलाफलं पर्याप्तफलान्यपर्याप्तफलानि च बुध्यन्ते (२१)॥ स्वयमात्मप्रयत्नेन च्छिन्नादानमप्युपादानं छिन्नं यस्य तत् कर्म भुज्यते, न तद् वर्ज्यतेऽवश्यं वेदनीयं भवति, यथा वल्लोनां फलाफलमिति पूर्ववत् पूर्वोत्पन्नं छिन्नमूलमपि भुज्यते (२२) ॥ (२३) ॥ अप्ररोहि यथा बीजं धूमहीन इवानलो नष्टसंज्ञो भ्रष्टोपदेश इव देशको गुरुस्तथा कर्म च्छिन्नमूलं (२४) ॥ येन कर्मणा युज्यते पुरुषस्तादृशं वेषं धारयति नटो यथा रङ्गमध्ये वृत्तकान्तिसमर्थः (२५) ॥ चित्रा नानाप्रकारा विविधोदया च देहिनां संसारसंन्ततिः सर्वे द्रुमालया वनानीव भवन्ति सर्वपुष्पफलोदयाः (२६) ॥ (२७- ३० यथा पञ्चदशेऽध्ययन एकादशादयः श्लोकाः) चञ्चलं सुखमादाय सक्ता मोहे मानवा भवन्त्यादित्यरश्मितप्ता इव मत्स्याः क्षीयमाणपानीयाः (३१) ॥ अध्रुवं राज्यं संश्रिता नरा अवशाः संक्षयं प्राप्नुवन्ति फलार्थिन इव च्छेद्य तरुमारूढाः (३२)॥ (३३) (३४)॥ मोहमोहितो मोहीनां मध्ये क्रीडति मोही यथा ग्रहीणां ग्रहवतां ग्रहगृहीतानां मध्ये ग्रही यथार्थं ग्रहमोहितः (३५)॥ नान्यत् कर्म नान्येषां देहिनां कर्म बध्नन्तो निर्जरयन्तश्च भवन्ति देहिनः, किं तु स्वकीयमेव, यथा वारिग्राहा घटीतो घट्यमाननिबन्धना भवन्ति, गृहीतं वारिमात्रं घटीमात्राधीनं भवतीति भावः (३६)॥ बध्यते मुच्यते चैव जीवाश्रितेण नानाप्रकारेण कर्मणा, यथा रज्जुपाशैर्बद्धः कश्चिदन्यस्य प्रयोगेनेर्यते चाल्यते (३७) ॥ (३८) (३९)॥ निश्चलं कृतारोग्यं त्रैलं क्यसंस्कृतं स्थानमुत्तमं प्राप्नुवन्ति जीवाः सर्वज्ञमार्गानुगताः (४०)॥ हरिगिर्यध्ययनम् ।

## २५

ततश्चाम्बटः परिव्राजको यौगन्धरायणमेवमवादीद् यथा देवानुप्रिय, मनसि मे गर्भवर्षाभ्यो मैथुनाद् विरतिः, कथं न त्वं ब्रह्मचारी भवसीति । ततो यौगन्धरायणोऽम्बटं परिव्राजकमेवमवादीद् यथा हारिताः पुरुषा एभिरेभिश्च तावदादानैः कर्मोपादनैः । ये खलु हारिताः पापैः कर्मभिरवियुक्तास्ते खलु गर्भवर्षासु सजन्ति । ते स्वयमेव प्राणिनोऽतिपतन्त्यन्यानपि जनान् प्राणिनोऽतिपातयन्त्यन्यानपि जनान् प्राणिनोऽ-

तिपातयतोऽनुमोदयन्ति समनुजानन्ति, एवमेव मृषा भाषन्त इत्यादि करणत्रिकम् , अविरता अप्रतिहताप्रत्याख्यातपापकर्मणो मनुजा इत्यतल्लक्षणात् पठितव्यत्वादिहापास्यम् , ते स्वयमेवादत्तमाददते अब्रह्म-परिग्रहौ गृह्णन्तीत्यालापकः पूर्ववत् । एवमेव तेऽसंयताऽविरता अप्रतिहताप्रत्याख्यातपापकर्मणः क्रियावन्तोऽसंवृता एकान्तदण्डा एकान्तबाला बहु पापं कर्म कलिकलुषं समर्ज्येतश्च्युता दुर्गतिगामिनो भवन्त्येभिर्हारिता आदानैः ।

ये खलु आर्याः पापैः कर्मभिर्विप्रमुक्ता भवन्ति ते खलु गर्भवर्षासु न सजन्ति । ते न स्वयमेव प्राणिनोऽतिपतन्तीत्यादि विपरीतं पूर्वं यावदक्रियावन्तः संवृता एकान्तपण्डिता व्यपगतरागद्वेषास्त्रिगुप्तिगुप्तास्त्रिदण्डोपरता निःशल्या आत्मरक्षिणो व्यपगतचतुःकषायाश्चतुर्विकथाविवर्जिताः पञ्चमहाव्रतधराः, धर त्ति अपरित्याज्यं, पुस्तकेषु तु न दृश्यते, तिगुत्त त्ति त्रिगुप्त न यथासंख्यं, पञ्चेन्द्रियसंवृत्ताः षड्जीवनिकायसुष्ठुनिरताः सप्तभयविप्रमुक्ता अष्टमदस्थानहीना नवब्रह्मचर्ययुक्ता दशसमाधिस्थानसंप्रयुक्ता बहु पापं कर्म कलिकलुषं क्षपयित्वेतश्च्युताः सुगतिगामिनो भवन्ति ।

हे भगवन्नम्बट, ते सूत्रमार्गानुसारिणः क्षीणकषाया दान्तेन्द्रियाः शरीरसंधारणार्थं योगसंधानाय नवकोटिपरिशुद्धेत्यादिप्रसिद्धलक्षणं पिण्डं तादृशां भिक्षां शय्यां चोपधिं च गवेषमाणाः साधवः सङ्गतगतहसितभणितैः सुन्दरस्तनजघनैश्च प्रतिरूपा रूपवत्यः स्त्रियो दृष्ट्वा न तेषां मनसाऽपि प्रादुर्भावं गच्छन्ति मैथुनार्था ग्रामधर्माः । एतावदेव ऋषिभाषितमित्यम्बटस्य संबोधितत्वादनुमेयम् , शेषाणामृषिभाषितानां वाग्वृत्तिं त्वनुसृत्य हारिता इत्यादि लघुवाक्यं यौगन्धरायणभाषितमिति ।

कथमेतदिति कथं सा क्षीणकषायता दान्तेन्द्रियतेत्युच्यते । सा भवति विगतरागता सरागस्याप्यपेक्ष्येति केवले स्वविषये न तु सर्वथा हतमोहस्येत्यर्थ इव दृश्यते । तत्र तत्रेतरेतरेषु कुलेषु पिण्डं गवेषमाणा इत्यादि पञ्चदशाध्ययनवत् (१)॥ स शुद्धपिण्डः कथमिति हस्ति-महावृक्षनिदर्शनं, पाउत्ति पात्रम , तैलपात्रधर्मेमप्रमादगुणवर्णनगर्भं पञ्चचत्वारिंशाध्ययनस्य द्वाविंशे श्लोके सूचितं किम्पाकफलनिदर्शनं मूढत्वप्रकाशकं च । अपरं च—यथा नामैकः शाकटिकोऽक्षं म्रक्षेदेष मम न भङ्क्ष्यति भारं च मे वहिष्यतीति चिन्तयन्, एतयोपमया श्रमणो निर्ग्रन्थः षट्सु स्थानेष्वाहारमाहारयन् नातिक्रामति, तद् यथा वेदना-वैयावृत्य-ईर्या-

संयम-प्राणवृत्ति-धर्मचिन्तेत्येतेषामर्थाय । अपरं च—यथा नामैको जतुकारकोऽङ्गा-रेष्वग्निकायं निसृजेदेष मेऽग्निकायो न विक्षायिष्यति जतुं च तापयिष्यामीति चिन्तयन्नेतयोपमया इत्यादि पूर्ववत् । अत्यच्च-यथा नामैको इषुकारकस्तुषेष्व-ग्निकायं शेषं तदेव, केवलमिषुं तापयिष्यामीति । अम्बटाध्ययनस्य यौगन्धराय-णाध्ययनमिति युक्ततरं नाम भवेत् ।

२६

कतरो धर्मः प्रज्ञप्तः ? धर्मं न सम्यग् जानीथेति भावः । हे आयुष्मन्तः सर्वे धर्मं यदि वा हे सर्वे आयुष्मन्तो धर्मं मम मत्तो वा शृणुत ! केनार्थेन ब्राह्म-णवर्णाभा न तु ब्राह्मणाः सन्तो माहण त्ति मा हन्तेति श्लेषाद् युद्धं शिक्षन्ते हिंसां प्रकुर्वन्ति (१) ॥ शस्त्रजीविनो हि यागे भवन्ति ब्राह्मणाः, लौकिकव्यापा-रेषु तु राजानः क्षत्रिया वणिजो वैश्याश्च, स्वधामानि स्वगृहाणि स्वात्मनो वा पिनिदधति निरुन्धन्ति विवेकात् ब्रह्मपालनाच्चेति तृतीयश्लोकस्योत्तरार्धं द्वितीयस्य पूर्वार्धेन सम्बन्धनीयम् (२.३) ॥ अन्धेन युगेनाचक्षुष्मता वाहयुग्मेन विपर्यस्त उत्त-राधरस्मिन्नध्वनि राजरथमारुढ इव अडणीए त्ति मार्गे युद्धमारभते, न तु युद्ध-भूमौ, सोऽब्राह्मणो यद् यद्धिंसनकर्म प्रकरोति तत् सर्वं सर्वथा हतबुद्धेरिव निर-र्थकमिति भावः (२.३) ॥ यथार्थनामा ब्राह्मणो न धन्वो न रथी न शस्त्रपाणिः स्यान्न मृषा ब्रूयान्न चौर्यं कुर्यान्न मैथुनं गच्छेन्न परिग्रहं गृह्णीयात्, स्यात् तु नियुक्ता-नामाज्ञापितानां दशानामपि धर्माङ्गानां ध्यानाध्ययनपरायणः (४.५) ॥ गुप्तैः सर्वे-न्द्रियैः सत्यप्रेक्षी स्याच्छीलप्रेक्षी च सप्तस्वपि शीलाङ्गेषु नियुक्तेषु (६) ॥ षड्जी-वनिकायहितः सर्वसत्त्वदयापरः स ब्राह्मण इति वक्तव्यो यस्याऽऽत्मा विशुद्ध्यति (७)॥ दिव्यं स कृषिं कृषेन्नार्पयेन्न तां मुञ्चेत् ।—आत्मा क्षेत्रं तपो बीजं संयमो युगलाङ्गले ध्यानं च फालो निशितः संयमश्च दृढं बीजमिति पादः संदि-ग्धपाठः पौनरुक्तयाच्छन्दसोऽशुद्धत्वाच्च (८) ॥ कूटेसु वञ्चकेषु पुरुषेष्वकूटत्वं सरल-त्वमङ्गीकरोति, अस्मिंस्तु पादे कृष्युपमा न दृश्यते, विनयो नियमनमिव स्थितः, तितिक्षा च हलेषा, दया-गुप्ती च प्रग्रहो (९) ॥ सम्यक्त्वं गोच्छणवो त्ति अज्ञा-तार्थः । समितिस्तु शमिला, धृति-योक्त्र-सुसम्बद्धास्ते ये सर्वज्ञवचने रताः (१०)॥ पञ्चैवेन्द्रियाणि तु क्षान्तानि दान्तानि निर्जितानि च यानि ब्राह्मणेषु तानि गोरू-पाणि गम्भीरं कृषिं कृषन्ति (११) ॥ तपस्तस्य निर्व्याजस्य ब्राह्मणस्यावन्ध्यं बीजं, अहिंसा परमं निधनं गोत्रं, व्यवसायस्तस्य धनं, सङ्ग्रहः संयमो युक्तौ बलिवर्दौ

(१२) ॥ धृतिर्बलं वसुधैका, श्रद्धा च निश्चला मेथिर्धुरोऽवष्टम्भः, भावना तु तस्य वृतिः, ईर्या सुसंवृतं द्वारम् (१३) ॥ कषायास्तस्य मर्दनं, कीर्तिवादश्च तत्क्षमा, निर्जरा तु ईषां लुनामि, एवं दुःखानां निष्कृतिर्भविष्यतीति तदभिप्रायः (१४)। एतां कृषिं कृष्ट्वा सर्वसत्त्वदयावहां ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाऽपि विशुद्ध्यति (१५) ॥ मातङ्गीयमध्ययनम् ।

## २७

साधु साधोः साधु वा सुचरितमव्याहताबाधिता श्रमणसम्पच्छ्रमणैः सह संवासः । न चिरं लौकिकजनेन संवसेन्मुनिः, संवासेन हि स्नेहो वर्धते । अनित्यचारिणो भिक्षोः कर्मणो हेतोरात्मार्थो दुःखायते दुःखमापद्यते (१) ॥ स्नेहबन्धनं प्रजहाय ध्यानाध्ययनपरायणो भवति । निहितेन वशीकृतेन सदापि चेतसा निर्वाणाय मतिं संदध्यात् (२) ॥ यो भिक्षुः परेण सत्यमागतस्तस्य कर्णसुखं वचनं ब्रूयात् सोऽनुप्रियभाषकश्चाटुकारः खलु मुग्ध आत्मार्थे हीयते नियमात् (३) ॥ यो लक्षण-स्वप्न-प्रहेलिकाः कुतूहलादाख्याति, तस्य नरो जनो दानानि प्रयोजयेत् , तत् तादृशं करणं श्रामण्यान्महदन्तरं भवेत् विपरीतं भवेदित्यर्थः (४) ॥ चेल त्ति चेटको दासो, यश्चेटकोपनयनेषु आवाहविवाहेषु वधूवरेषु च पार्थिवानां युद्धेषु चात्मानं योजयति तान्युपतिष्ठति, यो वा जीवनहेतोरात्मनः पूजनार्थं किञ्चिदिहलोकसुखम् इहलोकस्य मनोज्ञं प्रयुनक्ति प्रकरोत्यर्थिविषयेषु प्रदक्षिणः, उभयेषां तादृशं करणं श्रामण्यस्य विपरीतम् (५. ६ ) ॥ व्यपगतकुशलस्तु संछिन्नस्रोताः शोको वा प्रेम्णा द्वेषेण च विप्रमुक्तः प्रियाप्रियसहोऽकिञ्चनश्चात्मार्थं न जह्याद् धर्मजीवी (७) ॥ वारत्रकाध्ययनम् ।

## २८

छिन्नस्रोतसो निरुद्धास्रवान् भृशं कुरुत सर्वान् कामान् सर्वशः । कामा मनुष्याणां रोगा भवन्ति, कामा दुर्गतिवर्धनाः (१) ॥ नासेवेत मुनिर्गृद्धिमेकान्तमनुपश्यन । अकामाः पुनः कामान् कामयमाना दुर्गतिं यान्ति (२) ॥ ये कामेषु लुभ्यन्ति तेषां त्रिविधं जगत् तुच्छमिव भवति कामेष्वध्युपपन्ना बहवो जीवाः क्लिश्यन्ति (३) ॥ (४) (५) (६) (७) (८) (९) (१०) (११) (१२) (१३) (१४) (१५) (१६) (१७) (१८) (१९) (२०) (२१) ॥ अञ्जनस्य कज्जलस्य क्षयं वल्मीकस्य च सञ्चयं मधुनश्चाहारं चिरकालीनं दृष्ट्वा पुरुषस्य संयम उद्यमो वरः श्रेयान् भवेत् , न तु कामः (२२) ॥ उच्चावचं गोत्रमधिकृत्य विकल्पं

भावनयाऽनुप्रेक्षादिना विभावयेत्, न हैमं दन्तकाष्ठं खादेत् खादितुं कामयेत चक्रवर्त्यपि (२३) ॥ हे सुविहितपुरुष, अल्पकालकमन्तरं क्षणस्तोकमुहूर्तमात्रं प्राप्य तस्य विभावयतोऽपि विपुलः फलागमः, किं पुनस्तस्य यः सिद्धिं प्रति पराक्रामेत् ? ॥ आर्द्रकीयमध्ययनम् ।

२९

स्रवन्ति सर्वतः स्रोतांसि, किं न स्रोतोनिवारणम् ? कथं स्रोतः पिधीयत इति पृष्टो मुनिराख्यायात् (१) ॥ जाग्रतोऽप्रमत्तस्य मुनेरिन्द्रियाणि पञ्च सुप्तानि, सुप्तस्य मुनेस्तु पञ्च जाग्रति । पञ्चभिः सुप्तै रज आदीयते पञ्चभिर्जाग्रद्भी रजः स्थापयेत् (२) ॥ शब्दं श्रोत्रं, रूपं चक्षुर्गन्धं घ्राणं, रसं जिह्वा, स्पर्शं त्वगुपादाय मनोज्ञं वा पापकं वा मनोज्ञे न रज्येत्, पापके न प्रदुष्येत् मनोज्ञे अरज्यति मुनौ, इतरस्मिन्नमनोज्ञे न दुष्टे, अविरोधिषूदासीनेषु वस्तुष्वसुप्तो भवेज्जागृयात्, एवं स्रोतः पिधीयते (३–१२) ॥ (१३) (१४) (१५)....विधेयं गजं....(१६) (१७) (१८) (१९) ॥ वर्धमानाध्ययनम् ।

३०

यथासत्यमिदं सर्वम् । इह यत् क्रियते कर्म तत् परतः परलोकेऽवबुध्यते, मूलसिक्तेषु वृक्षेषु तेषां शाखासु फलं दृश्यते (१) ॥ (२) (३) ॥ हिंसन् हन्तारं लभते (४) ॥ (५) ॥ भद्रकानि भद्रकानीति मन्यन्ते जनाः, मधुरं मधुरं परुषं परुषमिति मनुते, कटुकं कटुकमिति भणितम् (६) ॥ कल्याणमिति भणतः कल्याणैतत्प्रतिश्रुत्, पापकमिति पापका (७) ॥ (८) ॥ वाय्वध्ययनम् ।

३१

पार्श्वीयाध्ययनस्य वृत्त्या इह योज्यन्ते व्याकरणैः । कोऽयं लोकः ? जीवाश्चैवाजीवाश्चैवेति लोकः ? चतुर्विधो लोको व्याख्यातस्तद्यथा द्रव्यतः क्षेत्रतः कालतो भावतः । कस्य वा लोकः ? आत्मभाव आत्मना भवति लोक इति योज्यम् । स्वाम्यमुद्दिश्य जीवानां लोको, निर्वृत्तिं निष्पत्तिमुद्दिश्य जीवानां चाजीवानां च । को वा लोकभावः ? अनादिकोऽनिधनः पारिणामिको लोकभावः । । केन वाऽर्थेन लोक इति प्रोच्यते ? लोकतीति लोकः । का गतिः ? जीवानां च पुद्गलानां च गतिर्द्रव्यतः क्षेत्रतः कालतो भावतः । व्याकरणस्य तु पाठान्तरं यथा जीवश्चैव गमनपरिणताः पुद्गलाश्चैव गमनपरिणता इति । कस्य वा गतिः ? जीवानां च पुद्गलानां च गतिरित्याख्याता । केचित्तु पठन्ति यथा

द्विविधा गतिस्तद्यथा प्रयोगगतिः स्वेच्छया गतिर्विस्रसा गतिस्तद्विपरीता जीवानां च पुद्गलानां चेति। को वा गतिभावः ? अनादिकोऽनिधनो गतिभावः। पाठान्तरं तु यथा औदयिक-पारिणामिको गतिभाव इति। केन वाऽर्थेन गतिरिति प्रोच्यते ? गम्यते इति गतिः। अन्ये तु गम्यमाना इति गतिरिति पठन्ति। इमानि चत्वारि पाठान्तराण्यस्याध्ययनस्यान्ते गतिव्याकरणग्रन्थात् प्रभृति सामित्तं ति यावदयं द्वितीयः पाठो दृश्यत इति प्रवेशितानि। उत्तरगामिनामपि सूत्राणां स द्वितीयः पाठ इति वक्ष्यते। ऊर्ध्वगामिनो जीवा, अधोगामिनः पुद्गलाः। कर्मप्रभवा जीवाः, परिणामप्रभवाः पुद्गलाः; कर्म प्राप्य फलविपाको जीवानां, परिणामं प्राप्य पुद्गलानाम्। द्वितीयः पाठस्तु पापकर्मकृतो जीवानां परिणामः, स एव पुद्गलानामिति। न कदाचिदियं प्रजा मनुष्यादिकाऽव्याबाधसुखमनुपरुद्धसुखमेषेत कशां कशायित्वा हिंसां कृत्वा। द्वितीयपाठस्तु यथा न कदाचित् प्रजा प्राकार्षीद् अदुःखमिति। जीवा द्विविधां वेदनां वेदयन्त्यनुभवन्ति, तद्यथा प्राणातिपातेन यावन्मिथ्यादर्शनेन। विरमणपदं त्विह न युज्यते। अस्येह दृश्यमानत्वाद् वृद्धलेखकदोषेण विस्मृतानि कानिचित् सूत्राणीत्यनुमीयते। पूरितं त्विदं छिद्रं II-पुस्तकेन यथा एवं यावन्मिथ्यादर्शनशल्येन कृत्वा जीवाः शातनां वेदनां वेदयन्ति। प्राणातिपातविरमणेन तु यावन्मिथ्यादर्शनशल्यविरमणेन कृत्वा जीवा अशातनां वेदनां वेदयन्तीति। एतेनैव प्रकारेण द्वितीयपाठेन पूरितं छिद्रं यथा आत्मकृतो जीवा भवन्ति, कृत्वा कृत्वा यद् यद् कृतवन्तस्तत् तद् वेदयन्ति, तद् यथा प्राणातिपातेन यावत् परिग्रहेणेति। स एव द्वितीयः पाठोऽनुबध्यते यथा एष खल्वसम्बुद्धोऽसंवृतकर्मान्तश्चातुर्यामिको निर्ग्रन्थोऽष्टविधं कर्मग्रन्थिं प्रकरोति, स च चतुःषु स्थानेषु विपाकमागच्छति, तद्यथा नैरयिकेषु तिर्यक्षु मनुजेषु देवेषु। आत्मकृता जीवा न परकृताः कृत्वा कृत्वा वेदयन्ति, तद्यथा प्राणातिपातविरमणेण यावत् परिग्रहविरमणेण। एष खलु संबुद्धः संवृतकर्मान्तश्चातुर्यामिको निर्ग्रन्थोऽष्टविधं कर्मग्रन्थिं न प्रकरोति, स च प्रागुक्तेषु चतुःषु स्थानेषु न विपाकमागच्छति। आदिपाठस्तु मिथ्यादर्शनविरमणेनेतिप्रभृत्यनुबध्यते यथा किं तु जीवाः शातनां नाशनां वेदनां वेदयन्ति। यो यदर्थं यद्वस्तुनो बिभेति तत् न समुच्छेत्स्यते अर्थात् स एव समुत्थास्यति। निष्ठितकरणीयः सन् मडाइ त्ति मृतादी प्राशुकभोजी, उपलक्षणत्वादेषणीयादीति व्याख्याप्रज्ञप्तिवृत्त्यनुसारेण व्याख्येयम्। स्पर्शुकेति स्थाने तु प्राशुकेत्ययुक्तं प्रवदन्ति वृत्तिकारानुयायिनः। मृतादी निर्ग्रन्थो निरुद्धप्रपञ्चो व्यवच्छिन्नसंसारो व्यवच्छिन्नसंसारवेदनीयः प्रहीणसंसारः प्रहीणसंसारवेदनीयो संसारमार्गान् न पुनरप्यत्रत्वं समागच्छति। पार्श्वीयमध्ययनम्। द्वितीयपाठस्तु

समापद्यते यथा लोको न कदाचिन्नासीन्न कदाचिन्न भवति न कदाचिन्न भविष्यति, अभूच्च भवति च भविष्यति च, ध्रुवो नित्यः शाश्वतोऽक्षयोऽव्ययोऽवस्थितो नित्यो भवति, यथा नाम पञ्चास्तिकाया न कदाचिन्नासन्नित्यादि एवमेव लोकोऽपि। समाप्तं पाठान्तरम्।

## ३२

दिव्यां भो कृषिं कृषेन्नार्पयेत्। —कुतः क्षेत्रं कुतो बीजं कुतस्तव युगलाङ्गले? गा अपि तव न पश्यामि, हे आर्य, का नाम तव कृषिरिति प्रश्नाः (१)॥ आत्मा क्षेत्रं तपो बीजं संयमो युगलाङ्गले अहिंसा समितिश्च योग्या, एषा धर्मान्तरा धर्मगर्भा कृषिः (२)। एषा कृषिः अलुब्धस्य पुरुषस्य शुभतराऽतिशुभा व्याख्याता, एषा बहुसती अतिसाध्वी परलोकसुखावहा च भवति (३)॥ एतां कृषिं कृत्वा सर्वसत्त्वदयावहां ब्राह्मणः क्षत्रियो वैश्यः शूद्रोऽपि वा सिद्ध्यति (४)॥ पिङ्गाध्ययनं षड्विंशस्य द्वितीयपाठ इव।

## ३३

द्वाभ्यां स्थानाभ्यां बालं जानीयात्, द्वाभ्यां स्थानाभ्यां पण्डितं जानीयात् यथा सम्यक्प्रयोगेन च मिथ्याप्रयोगेन च कर्मणा भाषणेन चेति श्लोकार्धम्। दुर्भाषितया भाषया दुःकृतेन च कर्मणा कार्याकार्यविनिश्चये बालमेतं विजानीयात् (१)॥(२) (३)॥ सुभाषितया भाषया सुकृतेन च कर्मणा पर्जन्यः कालवर्षीव यशोऽभिगच्छति (४)॥(५)(६)॥ साधुभिः संगमं च संस्तवं च धर्मं च कुर्यादिति स्पष्टं, कुतस्तु धर्मस्य विपरीतमधर्मं कुर्यादिति न ज्ञायते (७)॥(८)॥ क्षयि प्रमाणं वार्तां च देयाद् यो धनमर्जयति, सद्धर्मवाक्यदानं त्वक्षयममृतं च मतं भवति (९)॥ पुण्यं तीर्थमुपागम्य प्रेत्य भुञ्ज्याद्धीतं फलम्, सद्धर्मवारिदानेन क्षिप्रं तु शुध्यति मनः (१०)॥(११)(१२)(१३)(१४)(१५)॥ कल्याणमित्रसंसर्गं कृत्वा संजयो मिथिलाधिपः स्फीतं भुक्त्वा तन्मूलं भोजनं मूलं भवति यथा तथा दिवं गतः (१६)॥(१७)॥ आरुणीयाध्ययनम्।

## ३४

पञ्चसु स्थानेषु पण्डितो बालेन परीषहोपसर्गानुदीर्यमाणान् सम्यक् सहेत क्षमेत तितिक्षाधिवासयेत, तद्यथा बालः खलु पण्डितं परोक्षं परुषं वदेत्, तत् पण्डितो बहु मन्येत यथा दिष्ट्यैष बालो मे परोक्षं परुषं वदति, न प्रत्यक्षम्।

मूर्खस्वभावा हि बालाः, न किञ्चिद् बालेभ्यो कर्तृभ्यो न विद्यत इति । तत् पण्डितः सम्यक् सहेतेत्यादि । बालः खलु पण्डितं प्रत्यक्षमेव परुषं वदेत् , तत् पण्डित इत्यादि यावत् प्रत्यक्षं वदति, न दण्डेन वा यष्ट्या वा लेष्टुना वा मुष्ट्या वा बालः कपालेन वाऽभिहन्ति तर्जयति ताडयति परिताडयति परितापयति उद्रापयति व्यापादयति । मूर्ख इत्यादि पूर्ववत् । बालश्च त्ति संयोजने चेदर्थे वा पण्डितं दण्डेनेत्यादि यावद् उद्रापयेत् , तत् पण्डित इत्यादि यावदुद्रापयति, न केनचिच्छस्त्रजातेन किञ्चिच्छरीरजातं शरीरभागमाच्छिनत्ति वा विच्छिनत्ति वा । मूर्ख इत्यादि पूर्ववत् । बालश्च चेद् वा पण्डितं केनचिच्छस्त्रजातेनेत्यादि यावद् विच्छिन्द्यात् , तत् पण्डित इत्यादि यावद् विच्छिनत्ति वा, न जीविताद् व्यपरोपयति । मूर्ख इत्यादि पूर्ववत् । बालश्च पण्डितं जीविताद् व्यपरोपयेत् , तत् पण्डित इत्यादि यावद् व्यपरोपयति, न धर्माद् भ्रंशयति । मूर्ख इत्यादि पूर्ववत् । येन केनचिदुपायेन पण्डित आत्मानं मुञ्चेत् दोषाद् बालेनोदीरितात् । तदपि स दोष एव तस्य पण्डितस्य हितं भवेत् (१)॥ अप्रतिज्ञभावादुत्तरं न विद्यते, स्वयं पण्डितो वेषान् अनेकरूपान् भविष्यद्भवान् न प्रकरोति यदि वा वेसे त्ति दोसे त्ति स्थाने लेखनभ्रमात् । अप्रतिज्ञ इह लोके भवति यथार्थो ब्राह्मणः (२)॥ दीनेन सामान्येन पुरुषेण किं क्रियते देहकाङ्क्षणात् णण्णत्थ त्ति अन्यत्र, न किञ्चिदित्यर्थः । दीनस्य कालकाङ्क्षणं प्रायोपगमनादिना मृत्युप्रतिक्षणं वा लोकादनन्यत्वं वा आत्मस्वभावस्य हीयते न ज्ञायते (३)॥(४)(५)(६)॥ इसिगिरिध्ययनम् ।

## ३५

चतुःषु स्थानेषु खलु भो जीवाः कुप्यन्तो माद्यन्तो गूहन्तो लुभ्यन्तो वज्रं समाददति वज्रं समादाय चतुरन्तसंसारकान्तारे पुनः पुनरात्मानं परिविध्वंसयन्ति, तद् यथा क्रोधेन मानेन मायया लोभेन । तेषां च कषायाणामहं परिघातहेतोरकुप्यन्नमाद्यन्नगूहन्नलुभ्यंस्त्रिगुप्तस्त्रिदण्डविरतो निःशल्योऽगारवः स्त्री-भक्त-देश-राज-विशेषितचतुर्विकथाविवर्जितः पञ्चसमितः पञ्चेन्द्रियसंवृतः शरीरसंधारणार्थं योगसंधारणार्थं नवदोषकोटिपरिशुद्धं दशदोषविप्रमुक्तम् उद्गमोत्पादनदोषशुद्धं तत्र तत्रेतरेतरेषु कुलेषु परार्थं कृतं परार्थं निष्ठितं विगताङ्गारं विगतसरसाहार-धनवद्दातृवर्णनं विगतधूमं विरसाहारकृपणदातृनिन्दनवर्जितं शस्त्रातीतं शस्त्रपरिणतं पिण्डं शय्यामुपधिं चैष भावयामीत्यर्षिणा भाषितम् ।—अज्ञानविप्रमूढात्मा प्रत्युत्पन्नाभिधा-

रकः कोपं मानं मायां लोभं कृत्वा महाबाणमात्मा विध्यत्यात्मानम् । मन्ये बाणेन विद्ध एकमेव भवं विनीयते, क्रोध–मान–माया–लोभ–बाणेन विद्धस्तु भवसन्ततिं नीयते जनः (१–८)॥(९)(१०)(११)(१२)॥ स्वस्मिन् गृहे प्रदीप्ते किं परं गृहं धावसि ? स्वमेव गृहं निरिच्य ततो गच्छेत् परं गृहम् (१३)॥ आत्मार्थे जागृहि, मा भूः परार्थाभिधारकः, तादृशस्यात्मार्थो हीयते (१४)॥(१५) (१६) (१७)॥ जागृहि, मा स्वपिहि, मा धर्मचरणे प्रमत्तस्य तव चौराः पञ्चेन्द्रियादयः कषायान्ताः संयमयोगयोर्दुर्गतिगमने वा बहु कर्म कार्षुः, हिड त्ति कर्मविशेषणं त्वज्ञातार्थम् (१८–२०)॥ अज्ञात अट्टालके जाग्रच्छोचनीयोऽसि णाहिसि त्ति यथा कश्चिद् धनहीनो व्रणितः सन्नौषधमूल्यमविन्दन् दातुं न शक्यः (२१)॥ हे नरा, जागृत नित्यम् ! जाग्रतो हि सुप्तं स्वप्नमेव जागर्ति धर्मे जाग्रतोऽप्रमत्तस्यालस्यं न विद्यते स्वप्नकल्पमित्यर्थः । यः स्वपिति न स सुखी, जाग्रत् तु सुखी भवति (२२)॥(२३)॥ औद्दालकीयमध्ययनम् ।

## ३६

भृशमुत्पतता क्रोधेनेति शेषः उत्पतन्तं कञ्चित् प्रियेण प्रियवचनेन वक्ष्यामि किं शान्तं पापमिति सान्त्वनं वक्ष्याम्युत ण सन्तं ति अशान्तं तं पुरुषमिति शेषो वक्ष्यामि यथा हे तुष तुषकल्प निःसारजनेति ? एतत्तु मुनेर्न युज्यत इति भावः — मम चान्येषां च कोपः पात्रं प्रति किञ्चित् पुरुषं मुक्तो दुःखावहो भवति । तस्मात् खलूत्पतन्तं सहसा कोपं निगृह्णन्तु मुनयो यदि वा उत्पतन् कोपो निगृहीतव्यः । मोहं ति मोहः (१)॥ वह्नेर्बलं न क्षिप्तं नावमन्तव्यम् , क्रोधाग्नेस्तु बलं परं परमं वह्नेरल्पा गतिः, कोपाग्नेरमिता (२)॥ (३) (४) (५) (६) (७)॥ पूर्वं मेरुगिरिवद् गम्भीरसारोऽपि संयमे भूत्वा स्थित्वा कोपोद्गमरजसा धूत आवृतोऽसारत्वमतिच्छेयमभिगच्छति (८)॥ महाविष इवाहिः सर्पो दृप्तोऽदत्ताङ्कुरोदयोऽङ्कुरायाप्युदयो न दत्तो येन स तथा चरेत् स रुष्यंस्तिष्ठति विषं च वृथा मुक्तवान् निर्विषत्वमुपागतो भवति, एवं तपोबलस्थोऽपि नित्यं क्रोधपरायणोऽचिरेणापि कालेन तपोरिक्तत्वमृच्छति (९,१०)॥ गम्भीरोऽपि तपोराशिर्जीवानां साधुभिः पुरुषैर्दुःखेन कृच्छ्रतः संचितः, कोपाग्निस्त्वाक्षेपिणामाकर्षतां तपःकाष्ठानि दहति क्षणात् वनकाष्ठानीव दवाग्निः (११)॥ (१२) (१३) (१४)॥ महाराजत्ति सम्बोधनं श्लोकस्यान्यस्मात् कस्माच्चिदन्वयादिहावतारित्वं प्रकटीकरोति (१५)। दुष्टं करोति पुरुषमनिरुध्यमानः कोपः, विमुच्यमानस्तु भस्म करोति भस्मीकरोति,

दृष्टं च भस्म च समीक्ष्य प्राज्ञो जितात्मा सदा कोपं निरुन्ध्यात् (१६) ॥ तारायणीयमध्ययनम् ।

३७

सर्वमिदं जगत् पुरोऽदकमासीत् । — अत्राण्डं संततमत्र लोकः सम्भूतः, अत्र साश्वासो जातः, इदं नोऽस्माकं मते वरुणविधानमिति केचित् । अन्ये तूभयतःकालमुभयतःसंध्यं क्षीरं नवनीतं मधु समित्समाहारं क्षारं शङ्खं च पिण्डयित्वाऽग्निहोत्रकुण्डं प्रतिजागरयमाणो विहरिष्यामीति तस्मादेतत् सर्वमिति ब्रवीमीति । वयं तु नवि त्ति न माया नैवाद्भुतविधानं मन्तव्यं, किं तु न कदाचिन्नासीन्न कदाचिन्न भवति न कदाचिन्न भविष्यति च लोक इति वदामः । पडुप्पण्णं इणं सोच्च त्ति प्रत्युत्पन्नं वर्तमानमिदं श्रुत्वेति त्रीणि पदानि श्लोकपाद इव दृश्यन्ते न च पूर्वगतेन न नैव पश्चाद्गतेन सम्बद्धुं शक्यानि । सूर्यसहगतो निर्ग्रन्थो गच्छेदर्थाद् यत्रैव सूर्योऽस्तमियात् क्षेत्रे वा निम्ने वा तत्रैवोषित्वा प्रादुः प्रभातायां रजन्यामतीतायां रात्रावुत्थिते सूर्ये सहस्ररश्मौ दिनकरे कीदृशे ? तद् औपपातिकपाठेनोच्यते : विकसितोत्पले चोन्मीलितकमलकोमले च पण्डुरप्रभे रक्ताशोकप्रकाशे च किंशुकशुकमुखगुञ्जार्धरागसदृशे च कमलाकरषण्डबोधके तेजसा ज्वलति सति एवं तत्क्षणमेव प्राचीनां वा प्रतीचीनां वा दक्षिणां वा उदीचीनां वा दिशं पुरतो युगमात्रमेव प्रेक्षमाणो यथारीत्येतुं तस्य कल्पते निर्ग्रन्थस्य ॥ श्रीगिरीयमध्ययनम् ।

३८

यत् सुखं सुखेन लब्धं तद् अत्यन्तसुखमेव, यत् तु दुःखं दुखेन लब्धं मा मम तेन समागमो भूद् (१) ॥ इति बौद्धर्षिणा भाषितम् । — मनोज्ञं भोजनं भुक्त्वा मनोज्ञे च शयनासने मनोज्ञेऽगारे बौद्धभिक्षुः समाहितो ध्यायति (२) ॥ स एवामनोज्ञं भोजनं भुक्त्वा शयनासने चामनोज्ञे गृहेऽमनोज्ञे दुःखं ध्यायत्यार्तमपध्यानं करोतीत्यर्थः (३) ॥ तं तादृशमेवमनेकवर्णकमन्यतीर्थिकं भिक्षुं नानागुणपदार्थं वा परित्यज्य पण्डितः प्राज्ञो नान्यत्र लुभ्यति, एतद् यथार्थबुद्धस्य शासनम् (४) ॥ नानावर्णेषु शब्देषु रूपेषु गन्धेषु रसेषु स्पर्शेषु श्रोत्रादिप्राप्तेषु गृद्धिं वाक्प्रदोषं वा सम्यग् वर्जयेद् बुद्धिमान् पण्डितः (५) ॥ जाग्रतोऽप्रमत्तस्य मुनेरिन्द्रियाणि पञ्च सुप्तान्यात्मदुःखस्य कारणानि हेतवः कारणाद् वा दुःखस्योत्पादयमानत्वात्,

तस्यैव तु विनाशाय संततं सदा प्राज्ञो वर्तेत (६) ॥ व्याधिक्षयाय दुःखं वा सुखं वा यद यद् औषधं भवति तद तद् वैद्यस्य ज्ञानेन देशितं दिष्टम् , एवमेव मोहक्षयाय दुःखं सुखं वा यो य उपायो दिष्टो गुरूणा (७) ॥ न चिकित्सति कुवैद्यो यदि वा न चिकित्स्यते कुवैद्येन दुःखं सुखं वा यथाहेतु हेतुविशेषं विभज्य, किं तु सामान्यचिकित्सिते वैद्यशास्त्रे सुयुक्तस्य कोविदस्य दुःखसुखे भवतः सुज्ञाते। एवमेव मोहक्षये अर्थाज्ज्ञानमार्गे युक्तस्योभे सुज्ञाते, न त्वयुक्तस्य हेतुविशेषेणेत्यनयोः श्लोकयोरर्थं ग्रहीतुमस्मत्प्रयत्नः (८.९) ॥ संवेगो नरकादिगत्यवलोकनात् संभीतिर्निर्वेदो विषयेष्वनभिषङ्ग इति सिद्धसेनः । तुच्छे निःसारे जने संवेग इति, उत्तमे तु निर्वेद इत्येतौ दीनानां जनानां भावौ यदि वा दीनौ च भवतो भावौ चेति दीन-भावौ, तयोर्विशेषस्तयोर्विशेषमधिकृत्य तावद उपदेशनमुपदेशोऽस्ति, ज्ञानं लोकानामध्यात्मविद्यारूपं विना नास्त्युपदेश इति भावः (१०) ॥ नानाऽवस्थोदयान्तरे पुरुषाणां भिन्नावस्था अनुसृत्य सर्वज्ञैस्तीर्थंकरैर्भाषिता वाण्युपदेशः सामान्येन गीतनिर्माणोऽपदिष्टात्मपरिणामा भवति, विशेषे तु मर्मवेधिनी प्रत्येकपुरुषस्य छिद्रभित् (११) ॥ सर्वसत्त्वदयो वेषो लिङ्गलक्षितं मुनित्वं भवत्यनारम्भोऽपरिग्रहश्च, सत्त्वं सद्भावं तपो दानं चैव जिनसत्तमा भाषन्ते (१२) ॥ (१३) ॥ किमु दान्तस्यारण्येनाश्रमेण वा ? न किञ्चिदित्यर्थः , यथाऽतिक्रान्तस्य रोगाद् विमुक्तस्य पुरुषस्य भैषज्यं नास्ति न च शल्यस्याभेद्यता, तदपि स्वभावाद् अभेद्यम् एव (१४) ॥ सुभावेन भावितात्मनः शून्यमिव दृश्यतेऽरण्यं ग्रामे वा धनं, सर्वमेतद्धि जगद् धर्मध्यानाय तस्य भवति यथा शल्यवतश्चित्ते शल्यमार्तध्यानाय (१५) ॥ दुरन्तस्य तु चित्ते नानावस्था वसुंधरा पृथिवी दुःखरूपा सर्वं च कर्मादानाय भवति यथा कामिनश्चित्ते कामः (१६) ॥ (१७) ॥ सार्थकमर्थसहितमिवारम्भं करणं निरर्थकं जानीयाद् यथा प्रतिहस्तिनं पर्यस्तटं घातयति वारणः (१८) ॥ यो यस्य कार्यस्य योगः प्रयत्नस्तं साधयितुं योऽसमर्थः स तत् कार्यं सर्वं वर्जयति कामीव श्रमणस्य नग्नभावं मुण्डभावं च (१९) ॥ धीरः शरणं जानीयात् , न दुर्गादजेयात् कोटिं गिरिशिखरं शरणरहितमेति, दृप्तं सिंहं छेकं वेभं गजं जम्बुकः शृगालो न तेजयेत् क्षोधयेदिति, भोज्ज त्ति पाठो निरर्थकः शृगालस्य सिंहादिभोक्तृत्वासंभवात् (२०) ॥ वेषप्रच्छादनसंबद्धो रजोहरणादिलिङ्गसहितो नवतत्त्वरतोऽसंबद्धं तत्त्वविरुद्धं पुरुषं सदा वारयेत् , नालं भवति धारयितुं बुद्धिमान् नानारतिप्रयोजकं (२१) ॥ सर्वदा न क्रुध्येन्मुनिर्यदि तु केनचित् कारणेन

ब्रह्मचारी यतिः क्रुद्धः संज्वलेत् तदात्मनो मोहदोषनं वर्जयेत्, मूढस्य हि व्याधस्य सायकं मृगान् नाप्येति न विध्यति, एवं मूढो मुनिर्न भवेज्ज्ञानभाक् (२२) ॥ प्रच्छादनं वेषं रूपं लिङ्गं च निश्चयेन विभावयेत्, किमर्थं वा गायति व्याधस्तूष्णीका तु भवन्ति पक्षिणः ? गायतोऽपि व्याधस्य हननाभिप्रायं वेषाच्च लिङ्गाच्चानुमान्ति विहगा इति भावः (२३) ॥ लौकिककार्यनिर्वृत्तिप्रयोजके कार्यकारणे आदेये, ते एव मोक्षनिर्वृत्तिप्रयोजके विशेषतो विज्ञेये (२४) ॥ परिवारेण च वेषेण च यद् भावितं तद् विभावयेन्न च ताभ्यां वञ्च्येत, परिवारेणापि गम्भीरेण परिवृतो नीलजम्बुकः कथाप्रसिद्धो न राजाऽभवच्छ्वापदानामवञ्चनीयत्वात् (२५) ॥ अर्थादायिनमर्थलोभिनं जनं जानीयान्नानाचित्तानुभाषकमन्यमतानुगामिनं, तस्माद् अर्थसन्ततिं निरन्तरार्थलोभं पश्यतः श्रेयान् भवत्यर्थादायिभिर्विसङ्गो वियोगः (२६) ॥ दम्भकल्पं कृत्तिसमं कृत्या जम्बुकसमानं निश्चयेन विभावयेत् निखिलं राजप्रतापस्यामोघं कृत्वोपचारे वृत्तौ परीक्ष्यते विज्ञायते (२७)॥ स्वभावे दुर्बलं जानीयान्नानावर्णानुभाषकं विविधजात्यनुकारिणं यथा सुनन्दा पुष्पादाने प्लवकारगृहं गता, अस्य तु श्लोकार्धस्यार्थः कथाया अज्ञातत्वादस्पष्ट एव (२८) ॥ द्रव्ये क्षेत्रे च काले च सर्वभावे च सर्वथा सर्वेषां लिङ्गवतां जीवानां भावनां विभावयेत् । (२९) शारिपुत्रीयमध्ययनम् ।

## ३९

य इदं पापं कर्म न कुर्यान्न कारयेद्, देवा अपि तं नमस्यन्ति धृतिमन्तं दीप्ततेजसम् (१)॥ (२) (३)॥ चतुर्थस्य पूर्वार्धमपूर्णम्, उत्तरार्धं तु कर्मसञ्चयविषयं, यस्य विपाकेन साधुर्भूयोऽपि जायते (४)॥ रहस्ये खलु भो पापं कर्म समर्ज्य द्रव्यतः क्षेत्रतः कालतो भावतः कर्मतोऽध्यवसायतः सम्यग् अपरिकुञ्चमानोऽनिगूहन्नालोचयेत् ।—भद्रकैः रसैर्भद्रकेन च संवासेन लौकिकजीवितेन नास्ति मे कार्यम् । कीदृशेन संवासेन ? यत्र सञ्जयो काननवासिनो मृगान् वधायोपनामयति व्यापादयति (५)॥ सञ्जयीयमध्ययनम् ।

## ४०

पुरा अचिरादेव प्रव्रजितः सन् साधुरिच्छां यदि वा पुरा प्रव्रज्यायाः पुरस्ताद् इच्छन्नभिलाषवाननिच्छां कुर्याद् आत्मसन्तोषमङ्गीकुर्यात् ।—इच्छा बहुविधा भवति लोके यया बद्धः क्लिश्यति, तस्मादिच्छामनिच्छया जित्वा सुखम्

एषते (१)॥(२)(३)॥ इच्छतेच्छा वाञ्छेष्यते, अनिच्छन्नपि तामिच्छति, तस्मादित्यादि पूर्ववत् (४)॥ हे साधो, द्रव्यतः क्षेत्रतः कालतो भावतो यथास्थाम यथाबलं यथावीर्यमनिगूहन्नालोचयेरिति ब्रवीमि ॥ द्वैपायनीयमध्ययनम् ।

४१

येषामात्मा रूपमाजीवाद्धेतोर्नराणां बलदर्शनं तपोबलदर्शनाय भवति, ये जीवनार्थमात्मनस्तपोबलं नरान् दर्शयन्ति, ते जनाः स्वतप आमिषं कृत्वा जनं संनिचयन्ते मेलयन्ति (१)॥ तेषां सुकृतं तपो विक्रीतं भवति तच्च सुकृतमाश्रित्य जीवितं विक्रीतम् । कर्मचेष्टा व्यापारवन्तो जना अजात्या अनार्या वा मामकाः शठा भवन्ति, एतादृशांस्तान् जानीयात् (२)॥ यथोच्छिन्नगला अस्रोतंसि शुष्कस्थले वा मत्स्या वेदनं प्राप्नुवन्ति, तथाऽनागतमपश्यन्तो दुर्मतयः पश्चाच्छोचन्ते (३)॥ मत्स्या यथा क्षीणपानीयाः कंकानां घासमागता इति श्लोकार्धं पूर्वगतेन वा संबन्धनीयं लेखकदोषेण वा गलितमुत्तरार्धम् । प्रत्युत्पन्नरसे गृद्धा मोहमल्लप्रणुन्ना दृसां बलवतीमुत्कण्ठां प्राप्नुवन्ति वारिमध्ये वारणा इव (४.५)॥ आहारमात्रसम्बद्धाः कार्याकार्येभ्यो निर्मीलितचक्षुषः पक्षिणो विहगा घटकुम्भ इवावशाः पाशेन संक्षयं प्राप्नुवन्ति (५.६)॥ मधु प्राप्नोति दुर्बुद्धिः कथाप्रसिद्धः, प्रपातं तु न स पश्यतीति श्लोकार्धं पूर्ववत् । आमिषार्थी जीवः पुरुषो जीवे वा जीविते सम्यक्चारित्रं हिनस्ति (७)॥ अनर्घं मणिं मुक्त्वा सूत्रेण गुणेन केवलेनाभिनन्दति दुर्मतिः, स सर्वज्ञशासनं मुक्त्वा मोहादिकैः कषायैः स्वचरित्रं हिनस्ति (८)॥ श्रोत्रमात्रेण, न तु मुखेन ग्राह्यं विषं जानन्नेव तत्रैव श्रोत्रेणैव युनक्ति गृह्णाति, आजीवार्थं तपो मुक्त्वा संत्यज्य विविधं बहुप्रकारेण तप्यति, तप आश्रित्य जीवंस्तपआजीवेन जीवति (९.१०)॥ यो ज्ञानमेवोपजीवति स चरित्रं करणं च लिङ्गं च जीवनार्थम् उपजीवन्नविशुद्धमिति जीवति (१०.११)॥ विद्यामन्त्रोपदेशैर्दूतीसंप्रेषणैर्वा भाविभवोपदेशैश्चाविशुद्धमिति जीवति (११.१२)॥ मूलकर्मभिः कौतुककर्मभिः भाषया प्रणयिमिश्राख्यायिकोपदेशैरविशुद्धमिति जीवति (१२.१३)॥ यो बाल आजीवको मासे मासे कुशाग्रेणैवाहारमाहरति स स्वाख्यातधर्मस्य न शततमां कलामर्हति (१४)॥ परंतु मा मां कश्चिज्जानातु मा चाहं कञ्चिज्जानामीत्यज्ञातेनाज्ञातमर्थं समुदानिकं भिक्षालब्धं चरेत् (१५)॥ (१६)(१७)॥ इन्द्रनागीयमध्ययनम् ।

## ४२–४४

अल्पेनाकिञ्चन्येन बहु देवत्वं ज्येष्ठमुपरिभवं मध्यमं कनीयसमधस्तनं, यदि वा बहु बहूनि कुलानि माननीयानि धनवन्ति वा मध्यमानि कनीयांसि दरिद्राण्येषयेत् । निरवद्ये स्थितस्य न कल्पते पुनरपि सावद्यं सेवितुम् ।—सोमीयमध्ययनम् । लाभे यो न सुमना अतिहृष्टोऽलाभे यो नैव दुर्मनाः असन्तुष्टः, स खलु मनुष्याणां श्रेष्ठो देवानामिव शतक्रतुः ।—जमाध्ययनम् । यस्यात्मा द्वाभ्यामङ्गाभ्यां रागद्वेषाभ्यामुत्पीडयद्भ्यां नैवोत्पीड्यते स रागाङ्गे च विद्वेषाङ्गे च सम्यगात्मानं नियच्छति ।—वरुणाध्ययनम् ।

## ४५

अल्पं चायुरिह मानवानां सुचिरं च कालं यावन्नरकेषु वासः, सर्वे च कामा नरकाणां मूलम्, को नाम बुधः कामेषु रमेत् ? (१)।। पापं च कुर्यान्न प्राणिनो हन्याद् अतिगतरसः, न कदाचिद् उच्चावचेषु शयनासनेषु रमेत, किं तु तान् समतिक्रामेद् वायुरिव जलम् (२)–(३)।।(४)(५)(६)(७)(८)(९)(१०)।। यं हन्ताऽभियोक्ता विवर्जयति यद्विषं नरो न भुनक्ति यं वा व्यालं गृह्णाति नास्ति ततो भयम् (११)।। सरसं नीरं स्वच्छं प्रतिधावन्तं दंष्ट्रिणं शृङ्गिणं श्वापदं दोषभीरुणो विवर्जयन्ति, एवं पापं विवर्जयेत् (१२)।। पापकर्मोदयं प्राप्य दुःखेन दुःखभाजनं दोषेण च दोषोदयी पापकार्याणि प्रसूते (१३)।। उर्वीपाराज् जलौघान्तात् तेजन्या वा दग्धात् तृणगुच्छान् मृतोत्थितम् उक्तस्थानेभ्यो मृत्वा प्रत्यागतमनश्वरं जीवानां जीवितं, जीवदेव भवति फलमन्दिरं धान्यागारं कर्मफलभाजनमिति श्लेषः (१४)।। यदि यो म्रियमाणस्य वसुंधरां पृथिवीं सागरन्तां दद्याज्जीवितं वाऽनयोरेकतरं वरयस्वेति, ततः स मरणभीरुर्जीवितमिच्छति (१५)।।(१६)(१७)(१८)।। ये प्राणिनस्तांश्च घातं च प्राणिनां च या प्रिया दया, सर्वमेतद् विज्ञाय प्राणिघातं विवर्जयेत् (१९)।।(२०)(२१)।। तस्मात् प्राणिदयार्थमेकाग्रमना भूत्वा दयार्थी मुनिरप्रमत्तो विहरेद् यथा कश्चित् तैलपात्रधरः (२२)।।(२३)(२४)।। ये भावेनाभिनन्दन्ति जिनाज्ञां तेषां कल्याणानि सुखान्यृद्धयश्च सर्वथा न दुर्लभा भवन्ति (२५)।।(२६)(२७)।। अस्नातो वा यथा रम्यं सरो, व्याधितो वा रोगहरं वैद्यं, क्षुधितो वाऽऽहारं, रणे युद्धे मूढो व्याकुलो वा बन्दी लुण्ठितं, वह्निं शीताहतो वाऽपि, निवातं वाऽनिलाहतस्त्रातारं वा भयोद्विग्न, ऋणार्त्तो वा-

धनागमं, तथा शरणं प्रयतो मन्ये भवेज्जिनवचनं गम्भीरं सर्वतोभद्रं हेतु-भङ्ग-नयोज्ज्वलम् (२८–३०)॥(३१)(३२)॥ सर्वज्ञशासनं पुरुषेण प्राप्तं यदि तदा विज्ञानं प्रविजृम्भते प्रकटीभवति यथा तरूणां चारुरागमो मनोज्ञः प्रादुर्भावो दृश्यते पुरुषैर्हिमवन्तं गिरिं प्राप्तवद्भिः (३३)॥ सत्त्वादीनि वर्धन्ते यथा सुष्ठ्वाक्रान्तं सुप्रयुक्तमौषधं बलवीर्यं योजयति शरीरेणेति शेषः (३४)॥प्रचण्डस्य क्रूरस्य नरेन्द्रस्य कान्तारे संसारे च देशिकस्य गुरोस्तथा वैद्यस्यारोग्यकारण आज्ञाक्रोध आरोग्यार्थं प्रशस्तोऽप्याज्ञा दुःखावहा अमनोज्ञा दृश्यते, परंतु यन्नरेन्द्राद् यच्च ये संसारे देशकास्तेभ्यः शासनं वैद्याद् वा रोगोद्घातो रोगोन्मूलनं सर्वमेतद्धिते हितमतिहितं भवति (३५.३६)॥ जिनेन्द्रस्य शरण्यस्य द्युतिमतः संसार दुःखसंबाधे सर्वदेहिनां दुस्तारो भवत्याज्ञाकोप उग्राज्ञा, तथाऽपि त्रैलोक्यसारगुरु धीमतो भाषितमिदं कायेण श्रोत्रेण सम्यक् स्पृष्ट्वा गृहीत्वा यदि वा भाषितमाज्ञावन्मस्तके गृहीत्वा न पुनस्तस्माद् विरमेत् (३७.३८)॥ यथा योधो बद्धचिह्नो वर्मारूढः स्थिरायुधः सिंहनादं विमुच्य पलायमानो न शोभते किं स्ववमान्यतां गच्छति, यथा नागो भुजङ्गो महाविषोऽगन्धनकुले जातः स्वविषं मुक्त्वा भूयस्तत् पिबन् लाघवं याति, यथा च सर्पः कुलोद्भूतो रमणीयमपि भोजनं वान्तं पुनर्भुजन् धिग्धिकारस्य भाजनं भवति, अगन्धनास्तु नागा मरणं व्यवस्यन्ति न च वान्तमापिबन्तीति विपरीतमादिशति जिनदासो दशवैकालिकचूर्णौ, एवं जिनेन्द्राज्ञया सव्यथमात्मतस्तपसा शल्योद्धरणमेव तथा प्रदीप्ताद् गृहान्निर्गमनं सुखी सुहितं वा भवति, सुखमेव तत् (३९–४२) ॥ इन्द्राशनिर्दीप्तो वह्निर्ऋणमरिर्न तत् कुर्युर्यत् कुर्याद् आस्वाद्यमानसम्बन्धम् ऋद्धिगौरवम् ऋद्धीनां बहुमानः (४३)॥ शातकर्मेष्टं करणं दुःखकरं दुरन्तं भवति यथा सग्राहं शिशुमारादिगर्भं सरो बुद्धं विकसितोत्पलं वामया स्त्रिया वा कामिनोऽनुयोजितं विषं सामिषं वा नदीस्रोतो मत्स्यप्लवनयोग्यम्:(४४)॥ कोशीकृतः कोशे निहित इवासिस्तीक्ष्णो भस्मच्छन्न इव पावकस्तथा लिङ्गवेषपरिच्छन्नः पुमान् कुसाधुरजितात्मा (४५)॥ कामा मृषामुखिनो व्याजशीलास्तीक्ष्णाः, शातकर्मानुसारिणी तृष्णा चाशातं च, शीघ्रं च तृष्णा कामश्छिनत्ति देहिनं (४६)॥ सदेवोरगगन्धर्वं सतिर्यक् समानुषं जगत् ताभ्यां शात-तृष्णाभ्यां कृच्छ्रं वृत्तं संभूतं तृष्णापाशनिबन्धनम्, के ते ? उच्यते : अक्षोपाञ्जनं व्रणे लेपो यच्च जतुनस्तापनं यच्च ततो युक्तं कार्यकारणमिति (४७.४८)॥ आत्मनो जीवस्य खलु तीव्रवह्नेः संयमार्थं संयम आहारादिप्रतीकाररूपः सर्वज्ञ-

वचनेनाऽऽख्यातः (४९)।। हैमं वा बन्धनमायसं वाऽपि दुःखकारणमेव, महार्घ्यस्यापि दण्डस्य निपाते दुःखसंपद् भवेत् (५०)।। दिव्ये कर्तव्यासाध्यमाने ब्रह्मणः प्रतिरूपे क्रियमाणे धीमता मुनिना कार्यकारणमभिवार्य निराकृत्य देहधारणं विनीतं प्रायोपगमादिनाऽपनीतम् (५१)।। यथा सागरेणावनेर्योगः, आतुरो रोगी पुरुषस्तुरङ्गमारूढः, तृप्तकैर्भोजनम्, एवं निरर्थकमश्रद्धेयं वा देहरक्षणं जानीयात् (५२)।। जातं जातं वीर्यं संयमेन सम्यग् योजयेत् पुष्पादिभिर्मुकुलपुष्पफलै रक्षन्निव पुष्पाणामादिकारणं बीजम् (५३)।। वैश्रमणीयमध्ययनम् ।

समाप्तानि ऋषिभाषितानि ।

Advocatetanmoy Law Library